समीहायाः कार्यं कार्यः स्यात् तस्माद्धि व्याहरामीत्याभासः कार्यो यो सोऽविच्छेदजीवितः न चाविच्छेदम
यस्य विच्छेदमयः कार्यमिति युक्तम् तथाभूतकार्यकारणभावग्रहणोपायाभावात् नहि स्वात्मनियायमविच्छि
यति॰ न्नाभासः स परत्र विच्छिन्नं व्याहरत्ययमित्येवंरूपमाभासं जनयतीति इति केनचित् प्रमाणेन सिद्धं परसिद्धिपूर्वक
त्वादस्यार्थस्य परप्रमातृसिद्धेश्च एवंभूतार्थसिद्ध्यधीनत्वेनेतरेतराश्रयात् न चावश्यमविच्छिन्नाद्विच्छिन्नेन भा
व्यमिति नियमोऽस्ति व्यभिचारात् न च विच्छिन्नोऽप्याभास उत्पद्यतामिति तदनुसन्धानात् तदुत्पत्तिर्नियता न
त्सद्भावेऽप्यनुत्पत्तेः तदभावेऽप्युत्पत्तेः विच्छिन्नश्चाभासः परत्रोत्पद्यतामिति या समीहा तयास्तु परत्रोत्पन्न
स्याविच्छिन्नाभासस्य कार्यकारणभावग्रहणमवपरासिद्धो न युक्तमिति व्याप्तेरेवासिद्धिः प्रमात्रन्तराणां च

ईश्व. प्र. भि.

यदि भिन्नानि तदान्तनिष्ठानामवभासानां भेद एव ज्ञानाद्व्यतिरिक्तं चेति न्यायात् ततश्चैकात्मनिष्ठत्वाभावादेका
भासविश्रान्तेः सम्भूय प्रमातॄणां व्यवहारो न स्यादित्यन्योन्यानुपरक्तभूतग्रस्तप्रकृतिप्रायं जगदापद्येत अनुमी
यमानमपि बोधान्तरमनुमातृसंमतान्ह्योथा यदि भिन्नं तदस्ति तावत्सम्भवः यत्प्रमेयं बोधाद्भिन्नमस्तीति सहोपल
म्भनियमादेरनैकान्तिकत्वान्नीलपीतादिनापि प्रमेयराशिना किमयं कृतं येनास्य स्वरूपविश्रान्तिः न सह्यते तस्मा
त्प्रमातॄणामपि न प्रसिद्धिरेव सिद्धौ वा सर्वप्रमात्रन्तरगताभासानामेकैकत्र पृथगाभासवैचित्र्यहेतुभूतं वासनोद्बोध
वैचित्र्यं जनयेयुर्नियमहेत्वन्तराभावादिति तथापि न नीलादिवैचित्र्यसिद्धिः एवं वासनानां न कश्चिद्धेतुर्हेतूनां च वैचित्र्याण
मनुपपत्तिरेव तत एवास्थितमेतदभिन्नो बोधस्तस्याकस्मिकाभासभेदहेतुत्वानुपपत्तेः बाह्यार्थोनुमेयः संभाव्यत इति
यदि बाह्यार्थवादिनोच्यत इति श्लोकद्वयार्थः चेच्छेदः श्लोकद्वयवाक्यार्थशङ्कायोजकः ॥ ५ ॥ एवमाशङ्क्य
मानत्वेन परसम्भावनाद्दृष्टोदर्शिता अधुनात्वेनां सम्भावनां शिथिलयितुं तावदाह ॥ ॥ स्यादेतदवभा
सेषु तेष्वेवावसितेषु सत्सु व्यवहारे किमन्येन बाह्येनानुपपत्तिना ॥ ॥ स्यादेतदिति पूर्वोक्तसम्भावनाभ्युपगमे यदा
व्याख्यायते तदा किन्त्विति वाक्यशेषेण तच्छैथिल्यादिविषयं सम्भावनान्तरं श्लोकशेषेण दर्श्यत इति व्याख्येयं यद्
त^ दि व्याहारेण न सह्यते तदा स्यादेतदिति इदमेव सम्भावनान्तरं स्यात् यदनेन श्लोकेनोच्यते इत्येकवाक्यतया
नियोज्यम् अनयापि कष्टकल्पनया बाह्यानर्थान्प्रसाधयता भवता नैनं किञ्चित्कृतं त्वम् आभासैरेव तैर्भवद्भ्युप
गतैर्व्यवहारसिद्धेः नहि नित्यानुमेयेन काचिद्व्यवहार इति किं बाह्येन यत्र साधकं नास्ति प्रमाणं बाधकं च प्रकाशमा
नेदनुमेयतयापि प्रकाशमानाभाव इति तावन्मुख्यम् अभ्युपगम्य बाधकास्त्ववयविनो दृष्ट्यनुपपत्तिः समवा
यासिद्धिः कम्पाकम्पावरणानावरणरक्तारक्तादिभागभेदादिविरुद्धधर्मयोगः अणुसञ्चयबाह्यवादेपि सञ्चय

भात्र^

२२

परमा^

स्यान्यस्याभावादणव एव ते च यदि संयुज्यन्ते निरन्तरतया तदवश्यं दिग्भागभेदः दैवनात्तेषु षट्सु दिक्षु संबध्यमानेषु
षट्स्वणुषु मध्यमस्य परमाणोर्यत्रैव षाण्ड्ये कोलग्नः तत्रैव यद्यपरस्तदेकपरमाणुमात्रता अथान्यत्रैकोन्यत्रापर
स्तदवश्यं भागभेदापत्तिः इति भागा एव परमार्थसंस्तस्यापि षड्वस्तराणि विविति नाकिञ्चिदवाप्स्यते बाह्यतत्त्वतः नचै
तद्वाच्यं मूर्तानामेकदेशात्ता योगात्संयोगो भिन्नदेशत्वाद्व्याप्त्यप्रसक्तेस्तन्निष्ठं ह्यणुकं नाम कार्यद्रव्यमणुपरिमाणं तेभ्य
स्त्विन्ध्यामहत्कार्यमिति अवयविवादोयं स च पूर्वमेवापबाधितः यच्चाव्याप्यवृत्तित्वं संयोगस्योच्यते तन्निरंशो
कथं सङ्गच्छताम् स्वाश्रयं हि यद्यसौ समवैति किमन्यदस्यावशिष्टं यन्न व्याप्नुयादिति अभ्युपगम्य बाधकं चेदमिति
हि नात्रास्माभिर्भरः कृतः विस्तरेण च प्रज्ञालङ्कारे दर्शितमेतदाचार्यप्रज्ञाकरनन्दनेन ॥ ६ ॥ ननु बाधकं नाम
प्रमाणासिद्धे वस्तुनि न किञ्चित्कर्तुं समर्थं तेनैव दृष्टेन प्रमाणेन बाधकाभिमतस्य बाधितस्याप्रमाणत्वसंपादना
त् दर्शिते च हेतु साधकं प्रमाणं कार्यहेतुरूपतयाकस्मिकाभास इति कारिकयेत्याशङ्क्याह ॥ ॥ चिदात्मैव हि दे
३० वोन्तःस्थितमिच्छावशाद्बहिः योगीव निरुपादानमर्थजातं प्रकाशयेत् ॥ ॥ इह तावत्स्वप्नस्मरणमनोराज्य
सङ्कल्पादिषु नीलाद्याभासवैचित्र्यं बाह्यसमर्पकहेतुव्यतिरेकेणैव निर्भासत इति यद्यपि सिद्धमेव तथापि तदाभा
सवैचित्र्यं अस्थैर्यात् सर्वप्रमातृसाधारण्यात् पूर्वानुभवसंस्कारजत्वसम्भावनादवास्तवमिति शङ्केत यत्पुनरिदं योगिना
मिच्छामात्रेण पुरसेनादिवैचित्र्याणि निर्माणं दृष्टं तत्रोपादानं प्रसिद्धं मृत्काष्ठपुञ्जकोशोणितादि वैचित्र्यमयं न सम्भवत्ये
रू^ व न ह्येवं वक्तुं शक्यं सर्वगताः परमाणवो योगीच्छया डितिसङ्घटिताः कार्यमारभन्त इति यतः यत्र लोकप्रसिद्धका
रणाभावानतिक्रमसिद्धये निर्दिश्यते नचैतत्प्रसिद्धं परमाणुभ्य एव स्थूलं घटादि जायत इति किन्तु कपालादिद्व्य
वधानेन तत्रापि नियतसहकारिसमवलम्बनं करचरणादिव्यापारो विशिष्टदेशकालधर्माधिपत्ययोगः प्रि

ई.प्र.व. प्र.भि. द्वाभ्यां सप्रकाशं इतीयति चाक्षीय मायायोगी कुम्भं निर्मिमाणः कुम्भकारप्रसिद्धसमस्तसामग्रीसमर्जनपुरस्सरं च
दृश्यन्त कुम्भकार एव स्यात् तस्मात्प्रसिद्धकारणानां हेतुत्वे नेकिमसत्त्वेत्यमान परमार्थ एवाभ्युपादानकारणान्तरचिन्तय
ति तत्रेयोगिसंविद एव सा तादृशी शक्तिर्यदाभासवैचित्र्यरूपमर्थजातं प्रकाशयतीति तदस्ति सम्भवो यत्संविदे
वाभ्युपगतस्यातन्त्र्याप्रतीत्या तल्लक्षणादिशा विशेषवशात्संविदोऽनधिकात्मतायाऽनपायादन्तःस्थितमेव सद्बा
व जातमिदमित्येवं प्राणबुद्धिदेहादेर्वित्तीर्णाक्रियन्मात्रसंविद्रूपाद्बहिष्ट्वेनाभासयतीति तदिह विश्ववत्त्वाभासवैचि त्र्य.
त्र्यं चिदात्मन एव सा तत्त्रं किं नाभ्युपगम्यते स्वसंवेदनसिद्धं किमिति हेत्वन्तरपर्येषणप्रयासेन विघ्यते एव कारण
दमाह सर्वज्ञातावद्वादिना विषयव्यवस्थापने संविद्रूपमनपह्नवनीयं आदिसिद्धं हि तदित्युक्तं तस्य स्वातन्त्र्यमेव
देवस्वाभूनिदिष्टं चिद्रूपत्वमिति किमपरकारणान्वेषणाव्यसनेनेत्यादि इयस्मादेवं प्रकाशयति देव इति सम्भाव्यते न
प. स्मात्किंबाह्येनानुमतिनेति पूर्वपक्षसंबन्धाः॥ ॥नन्वेवमुभयथापि सम्भावनानुमानमुन्मिषति तत्र किंम...त्प्र कु.
तिविम्बितघटादिदृष्टा तिबिम्बिताभासवैचित्र्यं विना न दर्पणातिरिक्तं तत्र एव बाह्यमिमतं हेतुं कल्पयेम किं वा योगिदृष्टान्तेन संवित्स्वातन्त्र्यमेव
न्तेन ज्ञानप्र. हेतुभावेन ब्रूया मतादिदं संशयिकं वर्ततेत्याशङ्क्य बाह्यार्थानुमानसम्भावनां सूत्रद्वयेनाह॥ ॥अनुमानमनाभा पक्षानुमा.
तपूर्वेनैवेष्टमिन्द्रियम् आभानमेव बीजादेराभासाद्धेतुवस्तुनः॥ आभासः पुनराभासाद्बाह्यस्यासीत्कथञ्चन अर्थस्यानैव
तेनास्ति सिद्धिर्नाप्यनुमानतः॥ ॥नकेवलमनन्तरश्लोकानिर्दिष्टाभिर्युक्तिभिः प्रत्यक्षेण बाह्योर्थो नाभासते इयदेवहि
प्रत्यक्षं यन्नीलंभातीति स्वप्रकाशसंविन्मात्रं नाधिकं किञ्चिदिति यावदनुमानेनापि नास्य बाह्यस्य सिद्धिरित्यपिशब्दः
तत्रानुमानमत्र नैव प्रवर्तितुमुत्सहते प्रत्यक्षमपि न प्रत्यक्षसिद्धिमादध्यादित्यनेन तद्दर्शयते तत्रानुमानं विकल्पः स सूत्रद्वयेन.
विश्वायं विकल्पोऽनुभवमूल इति प्रसिद्धं तेनयत्स्वयं...नाभातपूर्वमननुभूतं तत्रानुमानमनुमितिव्यापारो विकल्पा

त्मानैव केनचिद्बाह्यादिनेष्यते ननु प्रत्यक्षतो भवतु द्विष्टेऽनुमाने सङ्केतग्रहणीयं सामान्यतोदृष्टे तु किं वक्ष्यसि यथार्थोपलब्धा
इन्द्रियानुमाने उच्यते तत्रापि किं विकल्पेन यथा सोऽर्थः स्पृश्यते तथानुमेय इति स्थितिः विकल्पश्च नेन्द्रियादिक
विशेषा. मर्थं केनचित्सन्निवेशात्मना स्पृशति अपितु किञ्चिद्रूपस्तु कारणमित्यनुगतस्वभावेन स च स्वभावः कारणता
लक्षणः प्रत्यक्षगृहीत एव [illegible]
अपितु किञ्चिद्रूपस्तु कारणमित्यनुगतस्वभावेन [illegible] तथा च बीजाद
कुरस्तत्पूर्वः पर इत्यादौ कार्यकारणभावः प्रत्यक्षानुपलम्भबलेन तावन्निश्चयः तत्र च प्रत्यक्षं प्रत्याभासं प्रामाण्यं
भजते विमर्शलक्षणस्य प्रमितिव्यापारस्य एकैकशब्दवाच्यार्थविश्रान्तेः तदनुसारित्वाच्च प्रमाणस्येति वक्ष्यते ॥
एकाभिधानविषयामिति च वस्तुन्यबाधितेति आभासमात्रं च सामान्यमिति निर्णेष्यते अनुपलम्भोप्यन्योपलम्भरू
मात्र. प आभासः विषयान्तर एवेति कारणाभासो विशेषशून्यः परिगृहीत एव बीजाङ्कुर इति प्रतीतो यद्यस्य नियममम द.
नुविधत्ते व्यतिरिक्तं तत्तस्य कार्यमिति प्रतिपत्तं मृत्तिकादिरूपस्य हेतुत्वं तद्धर्मात्मत्वाभासात् आभासो बाह्यः पुनराभा ना.
सरूपः स चाभासते इति विप्रतिषिद्धम् अनाभाते च नास्ति विकल्परूपस्यानुमानस्य व्यापारः ग्रामगृहादेस्तु यद्बा
ह्यं तद्ग्रामादिरूपं नोच्यते अन्यैकं वा टाक्रूपकुड्यतुल्यादेर्बाह्यत्वप्रसङ्गादपि तु तत्सन्निवेशरूपम् तस्माद्ग्राम्य बाह्यमा
स्य. ४ भास बाह्यमिति च प्राक्तनं ...मात्रमेतच्च वस्तुसाम्यम् एवं ये विकल्पे वस्तु नाभातीति मन्यन्ते तेषामपि तावदनु
मानविकल्पेन बाह्ये उपपन्नेः अस्माभिस्तु रूपपादितमध्यवसायस्याप्याभासमानविषयत्वं भ्रान्तित्वे चाव
त्मना सायस्येति सूत्रे तेनानुमानविकल्पोपि प्रकाशेन यद्यनाविष्टो नीलादिरर्थः तन्नानुमित एव स्यात् अथा
विष्ट एव तर्हि प्राग्विचार्यात् प्रकाश इति न्यायेन प्रकाशमात्रस्वभाव एव न बाह्यः तेन बाह्ये साध्ये यत्किञ्चित्प्रमाण
मानीयते तद्बाह्यतामेव प्रस्तुतं साधयतीति विरुद्धमेव अत एव कथञ्चनेति केनापि प्रकारेण प्रत्यक्षात्म

ईश्वर॰
प्र॰ वि॰

नानुमानात्मना वा आभासनमाभासस्य बाह्यस्यानाभासस्य न कदाचिदपि सिद्ध्येदिति तस्मात्सिद्धं चिदात्मैव हि देव इति ॥ ॥
नन्वन्तःस्थितं बहिः प्रकाशयेदित्युक्तं तदन्तःस्थितत्वमुपपादनीयमित्याशङ्क्याह ॥ ॥ स्वामिनश्चात्मसंस्थस्य
भावजातस्य भासनम् । अस्त्येव न विना तस्मादिच्छामर्शः प्रवर्तते ॥ ॥ बहीरूपतयाप्याभासनेन्तो
रूपतानत्रुट्यति प्रमात्रैकात्म्यमान्तर्यमिति हि वक्ष्यते न चासदेव प्रकाशस्य प्रमातृत्वात्तदात्मतया च विना
प्रकाशमानस्यावस्तुत्वात् किन्तु तत्राहमित्युचितपरामर्शो योयमिदन्तापरामर्शः स एव बाह्यता तच्चेदन्तःस्थित
त्वमहमिति एतावता चित्समुचितेनैव वपुषा परामर्शनम् तच्चेदं नीलादीनामस्त्येव न तु नास्तीति यादीदं तस्या
३॰ तत्कुम्भकृतो घटं करवाणीति या तत्क्रियापेक्षा या इच्छा प्राग्वाच्यः परामर्शः एषणीयात्मना स परामृश्योनान्तिय
२॰ न्त्रितश्चेत्तः घटेच्छापि सा न कस्मादिति सङ्कीर्णैव व्यवहारः अथ तत्रापि चेषणीयस्तदानीमेवानिर्मितः सत्त
थाजातः तर्हि तन्निर्माणं चिदात्मनि विनेच्छया नोपपन्नम् इति तदिच्छासारेवमिच्छावदहेतुनेत्यनवस्था यिष्यते तत्तच्चे
च्छान्तरमपि विषयनियन्त्रितं नवेति विकल्पेनवस्था तस्मात्सर्वोयं भावराशिश्चिदात्मन्यहमित्येव वपुषा सततं
वभासुरवपुः य एवं य इत्यात्मानन्दलक्षणं स्वामिभावाद्धि चित्रेण वपुषा क्रमाक्रमादिना संविदेनं बहिष्करोति
स्वप्रमातृभेदप्रथनपूर्वकं तत्रापि च चिदाभासं प्रमातृन्नेकीकरोतीति तन्निनीन्द्रवत्प्रवेद्याकान् तावतीहितेषामा
भासेष्वैक्यम् शरीरप्राणबुद्धिस्वाद्याभासांशेषु तद्भेदस्याविगलनात्सर्वथैक्यम् अतएवप्रतिदशं प्रमातृ
संयोजनावियोजनावैचित्र्येण परमेश्वरो विश्वं सृष्टिसंहारादिना प्रपञ्चयति तदुक्तमाचार्येण ॥ सदा सृष्टिवि
नोदाय सदास्थितिसुखस्थिने । सदा त्रिभुवनाहारतृप्ताय भवते नमः ॥ इत्यादि भट्टनारायणेनापि ॥ कुट्टकुट्टविप्रा
न्तस्त्रैलोक्यं कल्पनाशतैः । कल्पयन्नपि कोप्येको निर्विकल्पो जयत्यजः ॥ इति तस्मात्स्थितमन्तःस्थितं भावजातं तेन
विना तद्विषयस्य परामर्शस्यायोगादिति ॥ १० ॥ ननु परामर्शो नाम विकल्पः स चाविकल्पशुद्धसंविद्रूपे भगवति

विषयनियन्त्रितं चे
त्स्यादात्मतैवजाता
न चेद्घटे पटे च्छा
न प्रयतत्रापि नच
नीमेवेतिरात्तानव
स्या॰

२८

कथं स्यादित्याशङ्क्याह ॥ ॥ स्वभावमवभासस्य विमर्शं विदुरन्यथा । प्रकाशोर्थोपरक्तोपि स्फटिकादिजडोपमः ॥ ॥
इहावभासस्य प्रकाशस्यानवभासस्य चाप्रकाशस्य घटादेः परस्परपरिहारेण द्वयोरस्त्यात्मनि चेदवस्थानं तत्
स्फुटपरस्योरविदमजडमिमं जडमिति रूपपादनेवैलक्षण्यम् अथावभासोयतोर्थस्य सम्बन्धीति ततो नजडः
तर्हि सम्बन्धमात्रेणास्यदपि घटस्येत्यजडः स्यात् अथ न स्वसम्बन्धमात्रमपि त्वावभासोर्थस्य प्रकाशः तर्हि अर्था
त्मना स प्रकाश इति समापतितम् न चान्यात्मनान्यस्य प्रकाश उपपन्नः अथान्यस्वभावोपि घटोवभासस्य
अ॰ कारणम् तर्ह्यवभासोपि घटस्य कारणमिति घटोपि जडः स्यात् अथान्येनापि सता घटेन यतोवभासस्य प्रतिबिम्ब
रूपाच्छायादत्ता तामसावभासोपि बिभ्रद्घटस्येत्युच्यते तत्स्वाजडः तर्हि स्फटिकसलिलमणितादिरपि कु॰
एवंभूत एवेत्यजड एव स्यात् अथ तथाभूतमपि आत्मानं तं च घटादिकं स्फटिकादिर्न परामृशति समर्थ इति जडः
तथा परामर्शनमेव अजाड्यजीवितमन्तर्बहिष्करणस्थानन्यस्वरूपस्वाभाविकमवभासस्य स्वात्मविश्रान्तिलक्षणम
नन्यमुखप्रेक्षित्वं नाम अहमेवं प्रकाशात्मा प्रकाश इति हि विमर्शाद्यस्य संविदेव प्रमातृप्रमेयप्रमाणादिच
रितार्थमभिमन्यते न त्वतिरिक्तं काङ्क्षति स्फटिकादिस्तु हीतप्रतिबिम्बमपि तथाभावेन सिद्धो प्रमात्रन्तरम
पेक्षत इति निर्विमर्शत्वाज्जडं सर्वं तु वस्तु मा विमर्शात्मकप्रमातृस्वभावता दात्म्यं हि परामृश्यविश्रान्तेरजडमेव पूर्वा सं॰
परकोट्याः यदुक्तं इदमित्यस्य विच्छिन्नविमर्शस्य कृतार्थता । या स्वस्वरूपे विश्रान्तिर्विमर्शः सोहमित्ययमि
ति मध्यावस्थैवात्विदन्ताविमृश्यमानपूर्वापरकोटिः विमूढानां मायापदं संसार इति विमर्श एव प्रधानं भ
गवत इति स्थितम् ॥ ११ ॥ न केवलं संवित्तत्त्वस्यास्याभिरेव विमर्शप्राधान्यमुक्तं यावदागमान्तरेष्वपि इति द
र्शयति ॥ ॥ आत्मा न एव चैतन्यं चित्क्रिया चितिकर्तृता । तात्पर्येणोदितस्तेन जडात्सा हि विलक्षणा ॥ ॥

ईश्व· प्र·वि·

यतो विमर्श एव प्रधानमात्मनो रूपममुमेव हेतुं प्रयोजनरूपमुद्दिश्य आत्मा धर्मिस्वभावो द्रव्यभूतोऽपि चैतन्यमिति
धर्मवाचिना शब्देन सामानाधिकरण्यमाक्षिप्त्याह्नितः कथितः भगवता शिवसूत्रेषु चैतन्यमात्मेति पठितम् चैत
न्यमिति धर्मवाचकोपलक्षणम् चितिशक्तिरपरिणामिनी तद्रूपैः केवलं द्रष्टा दृशिमात्र इत्यादावपि हि धर्मि
शब्देन सामानाधिकरण्यमात्मनो दर्शितम् गुरुणा त्वनेन इत्याहितं इच्यते यद्विश्रान्तः पदार्थवर्गः सर्वो भाति
चार्थ्यते^ ^चार्थक्रियायै तद्यदि न कुप्यते तत्सकलोऽयं तत्त्वभूतभावभुवनसंभारः संविदि विश्रान्तः तथा भवतीति स
एव गुणकर्मादिधर्माश्रयभूतपदार्थान्तरस्वभावः तामेव मुख्यद्रव्यरूपामाश्रयते इति सैव द्रव्यम् तदनन्तथ
भित्ति^ मराशी विश्रमभूताया तस्याः स एव धर्मि चैतन्यम् इति कर्तृकृदन्तादुत्पन्नेन भावप्रत्ययेन सम्बन्ध्यस्य सम्बन्धि सम्बन्ध्याभिधायिना
विश्रान्तस्य प्रतीतेः द्रव्यरूपस्य सम्बन्धिनः प्रक्रान्त्योक्तत्वाच्चितिक्रियारूपं धर्मं सम्बन्धमवगमयता ष्यञ्प्रत्ययानिर्दि विश्रान्त्येन दर्शि
ष्ट एवांशः प्रत्याय्यते भवति चितिक्रिया चितेः कर्तृता स्वातन्त्र्यं संयोजनवियोजनानुसन्धानादिरूपमात्म तः^
मात्रतया एव जडवदविश्रान्तत्वमपरिच्छिन्नप्रकाशसारत्वमनन्यमुखप्रेक्षित्वमिति तदेव नानात्मरूपाणां जडा
विमर्शयमीदृ... स्वात्मा चैतन्यमित्यु... तामू^ नां संयोजनवियोजनं स्वातन्त्र्यं विकल्पाद्वैलक्षण्यदायीति तदेव परत्वेन प्रधानतया अभिसन्धाय आत्मा चेतन इति
वक्तव्ये धर्मान्तराधरीकरणाय चात्म चित्क्रिया चितिकर्तृता तात्पर्येणेति समासः अर्थयुक्त्या दविश्रान्तिरिति
अहिकाव्यसमयः न पाश्चिय यदि वा चित्क्रिया आत्मा उदितः चितिकर्तृता च निष्पृथगेव एवं न काचिदनुपपत्तिरिति हितम् ॥
१२ ॥ ननु यथा प्रकाशो प्रकाशश्चोभयमपि स्वात्मनि तत्तत्प्रकाश इत्युक्ते जडाजडत्वे वैलक्षण्यमुदितं स्यात्
दृ^ तद्विमर्शो द्वयोश्च स्वात्मनीति तेनापि कथं वैलक्षण्यं जडाजडयोरित्याशङ्क्याह ॥ ॥ चितिः प्रत्यवमर्शात्मा
परा वाक् स्वरसोदिता स्वातन्त्र्यमेतन्मुख्यं तदैश्वर्यं परमात्मनः ॥ ॥ चेतयतीति अत्र या चितिः चितिक्रि
विमर्शेपिच

२५

या तस्याः प्रत्यवमर्शः स्वात्मचमत्कारलक्षणः आत्मा स्वभावः तथा हि चैत्रेण स्वात्मनि चमत्क्रियते स्वात्मा न
परामृश्यते तेन स्वात्मनि तेन प्रकाश्यते नापरिच्छिन्नतया भास्यते ततो न चेत्यत इत्युच्यते चैत्रेण तु स्वात्म
न्यहमिति संरम्भो योगो ... विभूतियोगाच्च मात्क्रियते स्वात्मा परामृश्यते स्वात्मन्येव प्रकाश्यते इदमिति
परिच्छेदरूपतावद्रूपयात्तद्धि लक्षणीभावेन नीलपीतसुखदुःखवत्स्फुटतया संस्थावभासयोगेनाभास्यते^ प^
ततश्चैत्रेण चेत्यते इत्युच्यते एवं च विमर्शः स्वात्मनि अविमर्शोऽपि स्वोत्तमन्यसिद्धम् एतत्त्विमर्शो हि सर्व
सहः परमप्यात्मीकरोति आत्मानं च परीकरोत्युभयमेकीकुरुते एकीकृतं द्वयमपि न्यग्भावयतीत्येवं स्वभावः
प्रत्यवमर्शश्चान्तरभिलापात्मकशब्दनस्वभावः तच्च शब्दनं सङ्केतनिरपेक्षमेवाविच्छिन्नचमत्कारात्मकमन्तर्मु
प्र^ खशिरोनिर्देशप्रख्यं ... कारादिमायीयशाङ्केतिकशब्दजीवितभूतं नीलमिदं चैत्रोऽहमित्यादिप्रत्यवम
र्शान्तरभित्तिभूतत्वात्पूर्णत्वात्परा वक्तीति विश्वमभिलपति प्रत्यवमर्शेनेति च वाक् अत एव सा स्वरसेन चि
द्रूपतया स्वात्मविश्रान्तिवपुषा उदिता सततमनस्तमिता नित्या अहमित्येव एतदेव परमात्मनो मुख्यं स्वातन्त्र्य
मैश्वर्यमीश्वरत्वमनन्यापेक्षित्वमुच्यते परापरं त्विदंभावरूपस्य प्रत्यवमर्शस्या व्याति प्राणस्य ... बोध मात्रापि अ
हंभाव एव विश्रान्तेः श्रीसदाशिवेश्वरमायपश्यन्तीदशायाम् अपरं त्विदंभावस्यैवानिरूढो मायादिक्षितानामेव वि १भि^
सुविरिञ्चेन्द्रादीनाम् तत्त्वेषां परमेश्वरप्रसादजमेवेति अन्यनिरपेक्षतैव परमार्थेन आनन्दरूप ऐश्वर्यं स्वातन्त्र्यं चै
तन्यं च तस्माद्युक्तमुक्तं तेन जडात्सा हि विलक्षणा इति प्रथानागमेषु प्रत्यभिज्ञादर्शितमेवेति निरूपयति ॥ ॥
सा स्फुरत्ता महासत्ता देशकालाविशेषिणी सैषा सारतया प्रोक्ता हृदयं परमेष्ठिनः ॥ ॥ इह घटः कस्मादस्तीति व
पृष्टे कस्मान्नास्तीत्युक्ते वक्तारो भवन्ति यतो हि स्फुरति मम न अवितरदेति तदेतत्स्फुरत्त्वमेव यदि स्फुरत्ते स्फुरण
च

ई०प्र० सम्बन्धनस्तात्त्वस्य स्फुरेन्न कस्यचिद् । तस्मान्मम स्फुरतीति कोर्थः मदीयं स्फुरणं स्पन्दनमविष्ट इति स्पन्द
प्र०मि० नं च किंचिच्चलनम् । एषैव च किंचिद्रूपता यदचलमपि चलमाभासत इति । प्रकाशस्वरूपं हि मनागपि नाति
रिच्यते अतिरिच्यत इवेत्यचलमेवाभासभेदयुक्तमिव च भातीति । तत उक्तं आत्मैव सर्वभावेषु स्फुरन्निर्वृतचि
द्विभुः अनिरुद्धेच्छाप्रसरः प्रसरद्दृक्क्रियः शिव इति अतिक्रान्तः प्रत्यहोचाकिंकरोमीतिवा यत्र शान्ते यावन्ता यत्पद
गच्छेत्तत्र स्पन्दः प्रतिष्ठित इति स्पन्दतत्त्वविविक्तये इति गुरुणादिस्पन्दनिष्यन्दा इत्येच लोकेपि विविधे विच्य
योगेपि स्वरूपादचलत्वेन गम्भीरः स्पन्दवानित्युच्यते सत्ता च भवनकर्तृता सर्वक्रियासु स्वातन्त्र्यं सैव च
पुष्पादिकमपि व्याप्नोतीमिह तीदेशकालौ नीलादिवत्सेव स्रजतीति ताभ्यां विशेषणीया न भवति यादि
का० लयेन तत्कल्पत्वतया भाति तन्नस्या विशेषणं करूवचेत्तस्य न च देशकालौ विमर्शेण तत्कल्पकद्वयाभातः ।
यात० तयोरिदन्तत्त्वस्य चास्तत्त्वया प्रकाशेन तुल्यकल्पत्वानुपपत्तेः एवं देशकालस्पर्शोपि तान्निमीणस्योमादि देशकालास्पर्श
तितोपि व्यापकत्वनित्यत्वे उक्तं महासत्ता महादेवी विश्वजीवनमुच्यत इति सारमिति यदतुच्छरूपं न द्विभुत्वं च नित्यत्वं
दियमेव विमर्शशक्तिः ग्राह्यग्राहकानां यत्प्रकाशात्मकं रूपं तस्यापि प्रकाशे बलदायी दीपिका इयमेवेति ॥ चस्रकलं
श्रीसारशास्त्रेपि निरूपितम् यत्सारमस्य जगतः सा शक्तिर्मालिनी परेति सैषेति शक्तिप्रत्यभिज्ञानं द
र्शितम् हृदयं नाम प्रतिष्ठास्थानमत्त्वमुच्यते ततश्चोक्तानीत्या जडानां चेतनं तस्यापि प्रकाशात्मत्वं
तस्यापि विमर्शशक्तिरिति विश्वस्य परमेष्ठिदे विष्ठितो विश्रान्तस्थानमेव हृदयं विमर्शरूपं पुरस्तादात्म
कं तत्र तत्राभिधीयते सर्वस्य हि मनुष्यस्य हृदयं मनुष्यविमर्शात्मा विमर्शस्य च परवाकृत्तिमयत्वे तत एवा
तो नतेर्विनाभवेच्छेदो नार्थो नापि चितिरिति तत्र तावत्स मर्मयन्मात्मकाभावमित्यादिचेत्या

गमेषु तत्र भवद्भर्तृहरिणापि न सोस्ति प्रत्ययो लोके यः शब्दानुगमादृते अनुविद्धमिव ज्ञानं सर्वं शब्देन गम्यते ।
वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वती न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनीति सैषा संसारिणां सत्ता
बहिरन्तश्च वर्तते यदुत्क्रान्तौ विसंज्ञोयं दृश्यते काष्ठकुड्यवदित्यादि च तदेतेन नाविदुरित्येन तन्निर्वाहितं बोद्धृ
रप्यध्यवसायाये इदं प्रकाशस्य प्रामान्यवदङ्गिरूपगतप्राय एवायमर्थो भिन्नापात्मकत्वादध्यवसायस्येति
॥ १४ ॥ ननु सहस्रशक्तिश्रेणीशोभितवपुषि परमशिवे विमर्शशक्तिरेवेयमित्यं कारमभिषिच्यते कस्मा
दित्याशङ्क्याह ॥ ॥ आत्मानमत एवायं ज्ञेयीकुर्यात्पृथक्स्थिति । ज्ञेयं न तु तदौन्मुख्यात्खण्ड्येतास्य
स्वतन्त्रता ॥ स्वातन्त्र्यामुक्तमात्मानं स्वातन्त्र्यादद्वयात्मनः । प्रभुरीशादिसंकल्पैर्निर्माय व्यवहारयेत् ॥ ॥
सर्वाः शक्तीः कर्तृत्वशक्तिरेवैवयात्मा समाक्षिपति साच विमर्शरूपेति युक्तमस्या एव प्राधान्यमिति तात्पर्ये
णोत्तरसूत्रं शब्दार्थस्तु अयं प्रकाशात्मा परमेश्वरः स्वात्मानं ज्ञातृकर्तृरूपत्वादज्ञेयमपि ज्ञेयीकरोतीति य
त्सम्भाव्यते कारणान्तरस्यानुपपन्नत्वे दर्शितत्वाद् दृष्टेन सम्भावनानुमानेन तत्तत एव विमर्शशक्तिलक्षणाद
र्थत्वाद्धेतोर्भवति यतोऽयमात्मानं परामृशति ततो विश्वनिर्भरत्वात्तथा नीलादित्वेन च काशते नत्वेवं
वक्तुतः सम्भावना आत्मानं ज्ञेयी करोतीत्याह पृथक्प्रकाशाद्बहिर्भूता स्थितिर्यस्य ताद्रूप्यं नेवं भवति
तदवधारणे तत्र चोक्ता युक्तयः अनुसन्धेया युक्तिमप्याह यदि व्यतिरिक्तं ज्ञेयं स्यात् तज्ज्ञातृरूपस्यात्मनोऽय
दे तज्ज्ञेयविषयमौन्मुख्यं स्वसंवेदनसिद्धं दृश्यते तच्चासत्स्यात् तेन व्यतिरिक्तविषयौन्मुख्येनान्याधीन
त्वं नाम पारतन्त्र्यमस्यानीयते पारतन्त्र्यं च स्वातन्त्र्यस्य विरुद्धं स्वातन्त्र्यमेव चानन्यमुखप्रेक्षित्वलक्ष
णमात्मनः स्वरूपमिति व्यतिरिक्तोन्मुखे आत्मा नात्मैव स्यात् अनात्मा च जडो ज्ञेयं प्रतिनोन्मुखीभवे

ईश्व०
प्र०भि०

इतिप्रसङ्गः तत्र प्रसङ्गविपर्ययादिद्वमायातम् अव्यतिरिक्तोन्मुखः स्वतन्त्रः सन्नात्मानमेववेद्यीकरोति नचकेव
लं नीलादिरूपमेववेद्यं यावदन्यत्कर्तृस्वभावं स्वातन्त्र्येणापरित्यक्तमेवसन्तमात्मानमेवनिर्माय व्यवहारे
चं० णध्यानोपासनाप्रणीनो यदेष्वादिना योजयतीति यत्सम्भाव्यते तदप्यतएवेति सम्बन्धः ननुस्वातन्त्र्याश्रितश्च
निर्मीयते चेति विरुद्धमिदम् तत्राहाद्वयात्मन स्वसंविदेकरूपस्य स्वातन्त्र्याद्धेतोरिदं ननयुज्यते यात्किलमाया
पदेलिङ्गस्थितं प्रतिभातितन्तस्मादनेयदप्रातेर्हतं स्वातन्त्र्यं तदेवपुनः स्वातन्त्र्यमाहात्म्येन दर्शितम् अतएवे
त्यनेनतद्विमर्शिमात्रिरूपमित्यपुनरुक्तम् अथवातएवस्वातन्त्र्यादितिसामानाधिकरण्येनञ्जोकार्ध
येन सम्बन्धनीयम् उदाहरणमत्रार्थे दर्शयति नीलाद्धिनिर्माणवदस्यस्वातन्त्र्यनिर्माणस्याप्रसिद्धत्वा
त् ईश्वरोभगवानात्मानित्योविभुः स्वतन्त्रइत्येवमादौहि प्रमाताः सृजायितुः व्यातुर्वीएवगर्भितेतत्प्रमेयं
प्रमेयंरूपंचभातीतितत्तावन्निर्मितम् नचानीश्वररूपं एवंह्यीश्वर इतरीश्वरइति सङ्कल्पध्यानादेस्तत्य नीश्वर०
त्वस्यानुचैवंफलभेदस्योपलब्धेरिति तस्मात्स्वातन्त्र्यप्रकृत्यताभासनेनस्वातन्त्र्ययुक्तताभासनेन च यदि
दमुभयं तेयमात्मरूपमेवपरमेश्वरो भासयतितद्धिमर्शशक्तिबलादेवेतिसैवप्रधानमितिनि॥ ॥ननुप्रका
शबलाज्ञानुव्यवस्थासचप्रकाशोविमर्शसारइतिविमर्शाभेदेतदेवतदितिवक्तुंयुक्तं ईश्वरआत्मेत्यादि
सङ्कल्पेषु च निर्मितस्येदन्तयापरामर्शः स्वातन्त्र्यंतुहं परामर्शरूपमितिनिर्मितस्यतद्रूपत्वाभावेकथंस्वात
न्त्र्यमुक्तत्वमितितदेतत्परिहर्तुमाह॥ ॥नाहन्तादिपरामर्शभेदादस्यान्यतात्मनः अहंमृश्यतयैवास्य
५० सृष्टेरिच्छावत्कर्मवत्॥ ॥स्वरूपेभावप्रत्ययआदिग्रहणादात्मेश्वरादिपरामर्शाःतिङ्ग्रहणंप्रत्ययोपल
क्षणम् कर्मग्रहणंक्रियावाचिसदसत्त्वभूतशक्तिरूपोपलक्षणम् तदयमर्थः अहमित्येवंरूपोयःपराम

२८

निर्मेयरूपस्यचे
श्वरादिपरामर्शि
स्पदस्य०

र्शो यश्चेश्वरःप्रमातात्माशिवइत्यादिरनन्तप्रकारःपरामर्शस्तस्ययद्यपि भेदोन्यान्यरूपता तथापिनइदन्ता
तोरस्यात्मनोनिर्मातृरूपस्याहंपरामर्शमयस्ययोभेदःप्रातिङ्क्तःसनयुक्तः यतईश्वरइत्यपियःपरामर्शःस
ईश्वानशीलस्वातन्त्र्यकर्तृत्वतत्त्वेविश्राम्यति तात्पर्यादि चत्तानादौ स्वातन्त्र्यमनन्यप्रेरितत्वेअविच्छिन्न मुख०
ज्ञानादिशक्तियोगःअविच्छिन्नदपत्त्वात्मिकरोमीति अस्मदर्थविश्रान्तिर्वृत्ति अस्येश्वरस्यात्मनःसृष्टेःसृ न०
ज्यमानस्याहंविमर्शनीयत्वमेव सृष्टेरितिवाहेतौपञ्चमी अस्येश्वरस्य यतईश्वरादिसङ्कल्पेष्वप्यहंपराम
र्शनयोग्यस्यैवसृष्टिःअर्हकृत्यः यथाक्रियाकारकसमुच्चयविकल्पादिष्वन्यययथास्त्वंतिष्ठतीयादि
चवादिषुयोगाचस्येवपरामर्शापरमार्थःपाकःकर्तासमुच्चयोविकल्पःइत्यादिषाद्वेरभिधीयमानाःसत्त्व
भावमापादिताअपि पचतिचैत्रेणचैवेत्येवंभूतेमूलपरामर्शेविश्राम्यति अन्यथोक्तनाःप्रतीताःनैवभवे
युःतद्वदत्रापि एतदुक्तंभवति परामर्शानामविश्रान्तिस्थानंतत्स्वपार्यन्तिकमेवपारमार्थिकंतच्चाहमित्येव
रूपमेव मध्यविश्रान्तिपदं तुयद्यदा मूलस्थानीयंग्रामगमनेतदपेक्षयापूर्वमुच्यतेइतिकोविरोधः अनेननीलादेर
पिइदंनीलमितिमध्यपरामर्शपिमूलपरामर्शअहमित्येवविश्रान्तेरात्मरूपत्वमुपपादितमेवनीलमिदंवेद्म्यहंप्रकाशे
ढ० इतिहीयतत्त्वं यथोक्तमिदमित्यस्येत्यादि सूत्रस्तुनीलादिविमर्शोदेवार्थक्रियादिपरितोषाभिमानीति नीलादेः
स्वातंत्र्यनिर्मितत्वमुक्तं आत्मादौतुतन्मूलपरामर्शविश्रान्तिमंतरेणप्रतीतिपरिसमाप्तिमर्थक्रियांचमूलेऽपितामिम ढ०
न्यतइतितस्यानिर्मितावप्यनुज्झितस्वातंत्र्यत्वमुक्तं ॥ नन्वेवंविश्वपरामर्शानामहमित्येवविशुद्धैकपरामर्शविश्रा
प० न्तिरेवतत्त्वंतत्कथमिदमुच्यतेज्ञानमित्यादिकाअस्यप्राकयइतिज्ञानस्यचानिर्णयसंशयादिभेदानीलादीनांचवैचित्र्य
मित्याशंक्यायंपरिहारमाह॥ ॥आभासत्तयाविशेषैःसैवभिन्नसंवेद्यगोचरा कथिताज्ञानसंकल्पाध्यवसायादिनामभिः॥

ईश्व०
प्र० वि०
२८

अनुपपन्नमवभासमानं मायेत्युच्यते तत्र च भिन्नं प्रकाशात्सर्वमवभासजातं मायातत्त्वं च चित्तत्त्वस्यैव स्वातंत्र्यं मायाशक्तिः तया
भिन्नं यत्संवेद्यं प्रमातुश्चान्योन्यं तच्च मायाशक्त्या भिन्नेन प्रमात्रान्योन्यतो वेद्याच्च करणवर्गेण यत्संवेद्यं स एव गोचरो विश्रां
तिपदं यस्यास्तादृशी सती सैव प्रत्यवमर्शात्मा चितिः परा वाग्रूपा ज्ञानमिति संकल्प इत्यध्यवसाय इति चोच्यते आदिग्रह
णात्संशयः स्मरतिरित्यादि तथा हि यदिंद्रियेण स्फुरच्चाहिरेण बाह्येन विषयेण स्फुरणेन च नियंत्रितं संवित्तत्त्वं तज्ज्ञानं मन
सा विषयेन चास्फुरता संकल्पः बुद्ध्या विषयेण च विषयत्वपर्यंतभाजाऽध्यवसायो निश्चयः विषयस्य च यद्भिन्नत्वं
बहिरंतःकरणानां च तत्प्रकाशाभेदादनुपपन्नं चितितत्त्वे नावभासते इति भेदेऽपि तद्विश्रांतिर्न तद्भेदस्याभेदे ईश्वरसदा
शिवादिवत्ततो ज्ञानसंकल्पादयो भिन्नाः स्युस्तस्य प्रथमस्य स्वभावाभेदस्य संवित्तत्त्वस्यानुसंधानुः प्रातिपदत्वमनोः संप्र
यादयश्च भिन्ना नीलादिवैचित्र्यं चेति सर्वमवस्थितं ननु प्रत्यवमर्शात्मत्वं चितिशक्तेः सर्वसंकल्पस्मरणादिषु प्रातिश्रुत
विकल्पात्मिका सम्भवतु यानु निर्विकल्पदशा साक्षात्कारलक्षणानुभवशक्तिः तत्र कथं प्रत्यवमर्शो हि अभिला
पभेदयोजनामयः अभिलापविशेषयोजना च संकेतस्मरणमपेक्षते तच्च संस्कारप्रबोधः सोऽपि तादृग्दृशा इत्येवं प्र
थमसमये कथमभिलापयोग इति परस्य व्यामोहं शमयितुमाह ॥ ॥ साक्षात्कारक्षणेऽप्यस्ति विमर्शः कथमन्य
था । धावनाद्युपपद्येत प्रतिसंधानवर्जितं ॥ इह तावच्चैतन्यस्वात्मभूतेऽयम् इति निर्देशादि प्रत्यभिलापयोगः अन्यथा
बालस्य प्रथमं व्यवहारे दृश्यमाने व्युत्पत्तिरेव न स्यात् निर्विकल्पकविज्ञानपरंपरया हितं शब्दं शृणोति तमर्थं पुरः
पश्यति पुनस्तादृशं विकल्पं शब्दं पश्यति तच्चेष्टमानस्य नयेति व्यवहारात्कथमयमस्यार्थो हृदि परिस्फुरेत् घट इति इदमा
नयेति इदं नयेतीदमिति योजना प्राणिप्रत्यवमर्शः योजना च विकल्पव्यापारः अथ बालस्य प्राग्जन्मानुभूतसंकेत
स्मृतेरेवं तथापि संकेतकाले स्पष्टो विषयत्वेनऽभावेन प्रत्यवमृश्यमानत्वाद् इदानींत्व च्युत्यनिर्भासमाना विज्ञानपरी रावि
श्रांतीदानीं वाचक इति भवति। तद्विज्ञानस्य स्वरूपं चेद्भाति तदभिलापमयमेवेति, यथा विषयस्य स्वरूपत्वादभिलापमय
त्वमेव वस्तुतः सोऽमित्याद्यवस्यापि यदि न परामर्शमयी तर्हि स्यां विकल्पात्मकप्रमातृव्यापारानुल्लासात्संभवः शप
भोवेपि तानं तु स्वात्मकं भाति तथा २८
माभूदभिलापात्मा रूपादिर्विषयः तथापि
विज्ञानं तदात्मकमवभाति घटते अननुदर्शने
विषयस्यापि विमर्शमयता।

यपरमार्थ एव स्मरणं च न स्यात् तद्रूपविषयस्याध्यवसायी हि यदि विकल्पो ऽदियात्किमन्यत्सर्वचिंतासंहरणेन सैमित्यं नाम न
स्यादिति तत्राप्यस्त्यंतःपरामर्शः सकलेन च शब्दग्रामेण शब्दनं हि संहृतेव सध्वनि तत्र च नियतशब्दयोजना क्रियते तथा हि
बालस्य उत्तरतः पिंडे सदृशो यः परामर्शोऽहमित्यविच्छेदेन इदमिति विच्छेदेन वा तत्र घट एव गौरयमिति गौरिति वा शब्दआरोप्य
ते। सेयम्भ्यासात्प्रमातृमयी भवति न तु घटश्चान्यः पुलक इति बलीवर्द इति, एवमन्यदिति संकेतं तत्र तस्मादस्ति साक्षात्कारे
प्रत्यवमर्शः अपि शब्दस्यायमाशयः इह साक्षात्कारो वस्तुतः पश्यामीत्येवं भूतविकल्पनव्यापारपर्यंत एव, विकल्पो हि अस्य
तस्य व्यापार इति परोऽपि मन्यते न च व्यापारस्तद्वतोऽभिन्नो युक्तः तत्स्वरूपभूतो हि सः भवतु वाक्षणमात्रस्वभावः साक्षात्का
रः तत्राप्यस्ति विमर्शः अवश्यं चैतत् अन्यथा तिर्यादि स न स्यात्तदेकाभिसंधानेन तु जवाङ्कं स्मरितेति च वर्णान्यथनं इति च मंत्र
चं० पुस्तकं वाचयन्नाभिमतमेव गच्छत्युच्चारयेद्वायेद्वा। तथा हि तस्मिन्देशे ज्ञानमाविच्छिन्नमिषा अक्रमणमाक्रांतता ज्ञाने प्रयोज
नांतरानुसंधानं नित्यद्वादेशांतरानुसंधिः तत्राप्यापिचित्रिमिषेत्यादिना संयोजनवियोजनारूपेण परामर्शेन विनाभिमतदेश
कृ० वाप्तिः कथं भवेत् एवं त्वरितोच्चारणावाचनादौ मंतव्यं तत्र विशेषतः स्थानकरणाक्रमरणादियोगः अत्र च यतः पश्चाद्भाविस्थ
लविकल्पकल्पना न संवेद्यते ततस्त्वरितमिति सूक्ष्मेणाप्रत्यवमर्शेन संवर्तितं शब्दभावनाप्रकारेण न विवर्त्यमानास्थूला विक ऽशब्दभावनामयेनभा वमेव संवर्तितान्हि ^
ल्पः यथा इदमित्यस्य प्रसरणाच्चटः पुलक इत्यादि स्तस्यापि पृथुबुध्नोदराकारः पुलको नजातियुक्तो गुणसमवायीत्यादिः धावना
तिश्चिद्विविति पाठाद्वाविस्त्वरितगतोऽस्वप्नादिवशाद्ध्वनितशति ॥ १९ ॥ भवत्वेवं स्फुटो विमर्शः प्रकाशशरीरावेशी यत्र तु स्फु
लत्वेन विकल्परूपतास्फुटा तत्र शब्दो नीलादिवदेव पृथगाभासते। नीलमिदमिति स कथं प्रकाशस्वरूपादपृथग्भूतः स्यात् प्र
काशात्मा च विमर्शः स चात्र मायात्मके भेदपदेऽपि प्रकाशापृथग्भूतो भवद्भिरिष्टस्तदेतत्कथं प्रतिपत्तव्यमित्याशंक्याह ॥
घटोऽयमित्यध्यवसा नामरूपातिरेकिणी परेशशक्तिरात्मेव भासते न त्विदंतया ॥ केनेदृक्तं घट इति यः स्थूलः शब्दः स प्र
काशजीवितस्वभावो विमर्श इति सोऽपि हि स्थूलः शब्दोऽर्थवत्पृथग्भूतः एव भाति नो नाम रूपलक्षणोपाध्यर्थावेकरूपतया सो
यमित्येवं रूपत्वेन परामृश्यंती अध्यवसायशक्तिर्या सा परमेश्वरशक्तिर्विमर्शः स्यात् आत्मवदेवाहमित्यपृथक्छिन्नत्वेन भाति ॥ ०
० नरुकमाजिसिस्नुयाविश्विवेदेनशरि पुरस्तुय

ई.प्र.वि.
प्र.भि.
२५

विच्छिन्नतेनावभासे परप्रतिष्ठत्वात्पुनर्विमर्शान्तरेणाभाव्यं तत्राप्येवमित्यनवस्था अतो नीलस्य प्रकाशनमेव न स्यात् प्रतिष्ठा
लाभाभावात् तस्मात्सर्व एव विमर्शः प्रकाशादविच्छिन्न एवेति अध्यवसे इति आत्मनेपदमुपसर्गेऽन्यत्र इडंतः स्त्रियाम् ॥ २० ॥ नन्वेवं सर्व
स्यैव ज्ञानकलापस्याहमित्येवं प्रतिष्ठत्वे वेद्यभूमिस्पर्शनास्ति वेद्यभूर्विविचे देशकालयोगो नन्वेवं कस्य देशकालयोगाभावे च य
दिदं ज्ञानानां स्वांशापेक्षया ज्ञानान्तरापेक्षया च सक्रमत्वं लक्ष्यते तत्कथं स्यात् क्रमाभावे चैकात्म्यमेव वस्तुतो भवेत् ततश्च ज्ञानस्मृ
त्यादिशक्तिभिः लब्धान्यासमेश्वरइति यदुक्तं तत्कथं निर्वहेदित्याशंक्याप्याह्निकार्थमुपसंहरति ॥ ॥ केवलं भिन्नसंवेद्यदेश
कालानुरोधतः ज्ञानस्मृत्यवसायादि सक्रमं प्रतिभासते ॥ ॥ सत्यमक्रममेवं संवित्तत्त्वं किं तु स्वशक्तिवशाद्भिन्नत्वेन भासि
तानि यानि वेद्यानि तेषां मूर्तिभेदकृतो यो दूरादूरत्वे तन्न्यायेन तन्त्वादिर्देशः क्रियाभेदकृतश्च चिरशीघ्रक्रमादिरूपः कालः स्तत्
वस्तुरूपच्छायामात्रेण लब्धज्ञानस्मरणाध्यवसायानां स्वांशा इवाभान्ति निरंशानामपि तद्रूपासमानानां कृतश्च सक्रमत्वा
वभासः परस्परापेक्षया स्वांशापेक्षया च यद्यपि कालक्रम एव स्फुटो विज्ञाने भाति न देशक्रमः तथापि चिन्मूर्तस्य पर्वतसं
वेदनं विततमिव बदरसंवेदनं च सूक्ष्ममिव भातीति देशक्रमोऽपि दर्शितः तेन वेद्यगतक्रमस्वीकारावभासात्सक्रमत्वमाभास
मानमपि नापारमार्थिकं आभासमानस्य परमार्थत्वात् ततश्च युक्तमुक्तं ज्ञानादुद्योऽस्य भगवतः शक्तय इति मायाशक्त्या
विभाति हि श्लोकेन स्वांशवैचित्र्यं ज्ञानानां दर्शितं अनेन तु देशकालवैचित्र्यमिति विशेष इति शिवं ॥ ॥ इति श्रीमदभि
नवगुप्ताचार्यविरचितायां प्रत्यभिज्ञासूत्रविमर्शिन्यां ज्ञानशक्तिनिरूपणे पंचममाह्निकम् ॥ ५ ॥ स्वात्माभेदपत्तावाभावा
स्तद्योहनटंकतः क्लिन्नस्य खेचकयाविद्रूपकृतं स्तुमः शिवम् ॥ एवं स्मृतिशक्तिं ज्ञानशक्तिं च निरूप्य अथ तदुभयानुग्रा
हिकापोहनशक्तिर्वितत्य श्लोकैकादशकेनाहंप्रत्यवमर्शो यः प्रकाशात्मेत्यादिना सिद्धेः सर्वस्य जीवनमित्यंतेन निर्णीयते ॥
तत्र श्लोकेन प्रत्यवमर्शो न विकल्प इति सूच्यते ततः श्लोकेन षड्भिरहंप्रत्यवमर्शेऽपोहनव्यापारासंभव उच्यते ततः स्वरूपा
देव तदुपपत्तिरिति श्लोकेन ततोऽपि द्वयेनाप्युत्साहमित्यवमर्शस्याविकल्परूपता ततः श्लोकेनानुसंधानस्यापि वि
कल्पता एवंभूतानुसंधानादिरूपमेव परमेश्वरस्य स्वरूपमिति श्लोकेन ततः प्रकृते चिदात्मन्यर्थावभासस्य संभवोप स २५

वि.

द्भियते श्लोकेन ततो द्वयेन तस्यैवार्थावभासस्यानुभवस्मरणादौ वैचित्र्यमुच्यते तत्र श्लोकेषु प्रकृतायामीश्वरस्वरूपस्यात्म
प्रत्यभिज्ञायामुपयुज्यत इति श्लोकेनेत्याह्निकस्य तात्पर्यार्थः ॥ अथ ग्रंथार्थो व्याख्यायते ॥ उक्तमिदं ॥ स्वभावम
वभासस्य विमर्शं इति तत्र विमर्शोऽभिलापात्मना शब्देन योजित एव न योजना कृतं च विकल्पस्वरूपत्वं शुद्धेऽपि परमेश्व
रेऽपि न चैतदिष्टं तस्य संसारपदे मायात्मन्यनुप्रवेशप्रसंगादित्याशंक्याह ॥ ॥ अहंप्रत्यवमर्शो यः प्रकाशात्मापि वाग्वपुः
नासौ विकल्पः स ह्युक्तो द्वयाक्षेपी विनिश्चयः ॥ ॥ प्रकाशस्य विशुद्धसंविद्रूपस्य देहादिसंस्पर्शरहितावितलीभूतस्य य आत्मा जी
वितभूतः सारः स्वभावो विमृष्टुं दक्षत्येन्या तदुपगमकल्पोऽनन्यमुखप्रेक्षित्वसातत्यविश्रान्तिरूपः अहमिति प्रत्य
वमर्शः असौ विकल्पो न भवति विकल्पत्वापेक्षायां बीजं दर्शयति वाग्वपुरपीति विमर्शरूपत्वादत्र च शब्दात्मत्वेऽपि इदन्य
बीजतरवभासमानः संविद्रूपा वैखरीशब्दनात्माभिलापो वा वागित्यनेनोक्तः वक्तव्यार्थः संवेदनसंसर्गमित्यभिसंबन्धेन
यदि वाग्वपुः कस्मान्न विकल्पः आह न ह्यस्य विकल्पलक्षणमस्ति तथाहि विविधा कल्पना विविधत्वं च शंकितस्य
कल्पितस्य व्यवच्छेदनं विकल्पः विविधत्वं च वस्तुनि संभावना समारोपनिरासे सति भवद्द्वयं वस्तु द्वितीयमाक्षिपति
तेन विकल्पे वर्ण्यमानं स्वभावनिश्चितव्यं अत्र च व्यपोहितव्यं भवति १ तथा च ॥ भिन्नयोरवभासो हि स्याद्घटाघटयोर्द्वयोः
प्रकाशस्यैव नान्यस्य भेदिनस्त्ववभासनं ॥ ॥ घटे हि दृष्टे घटस्यानवाघटोऽपि योग्यदेशाभिमतस्थानाक्रमणशीला
चित्तानजनकः स्वकारणोपनीतः संभावितप्रदादिस्वभावः अतो घटाघटयोर्द्वयोरवभाससंभवस्य संभावनात्मसमारो
ए. पः सावकाशो भवति अघटस्य तत्राप्रतिनिषेधलक्षणोऽपोहनव्यापार इति तदनुप्राणितो विकल्परूपता घट इत्य
स्यानिश्चयस्य लिंगभावनायां यस्त्वयं प्रकाशस्तावतामतस्य स्थानेयः संभावितेस्तावदप्रकाशरूपो न भवति तुल्यक
ल्पस्यापि संभावनं भवति न च यत्प्रकाशनकर्तव्यं तदप्रकाशस्य कदाचिद्दृष्टं संभावनारोपतादिबलादेव चाप्रकाश
२ प्रकाशरूपत्वं विघटते अतः प्रकाशतुल्यस्यान्यस्याप्रकाशरूपस्य भेदिनस्तत्तुल्यकल्पस्यापोहनात्मकभेदनव्यापार
सहितस्यावभासनमेव नास्ति तदभावे कस्यापोहनं अवभाससंभवेऽपि प्रकाशस्वरूपमेव न च प्रकाशस्य स्वरूपदेशका
लभेदो येन द्वितीयः प्रकाशः परकः स्यात् प्रकाशादपोह्येतेति द्वितीयस्य संभवः एवं ततो द्वयाभावादपोहासंभवे विकल्परूपता

ई·प्र·वि·
३०

भावाच्चिन्मात्रपरामर्शात्मनि अहमितिप्रत्यवमर्शी एवं तु विकल्पः ॥ ननु घटेपि विनिश्चिते स्येह घटेतद्दर्शनमुपजीवता
विकल्पेन कथमघटस्य निषेधनं क्रियते नह्यघटस्यकेनचिन्नामापि स्पृष्टुं हीतं अघटवासनापि घटेदृष्टे कथं कारं प्रबुध्य
तां सत्यमेवं प्राक्तु पर्यन्ते योज्या, ननु वयम् यतः ॥ ॥ तदन्यप्रतिभाभाजामात्रैवा तदपोहनात् तन्निश्चयनमुक्तो
हि विकल्पो घट इत्ययं ॥ ॥ इह प्रमाता नाम प्रमाणाद्व्यतिरिक्तः प्रमा हि स्वतन्त्रः संयोजनवियोजनाद्याभासवपुषात्कर्तृताद
र्शितः तस्य च प्रमातुरन्तः सर्वार्थावभासः चिन्मात्रस्पर्शी सोपि तत्समानाधिकरणपरत्वेऽपि दर्पणनगरन्यायेनास्तीत्यु
क्तं एवं च तत्प्रतिभां घटावभासमन्यप्रतिभां चाघटावभासं प्रमाता भजते सेवते तावत् तदविकल्पदशायां चित्स्वभावो
सौ घटाद्विव देवविश्वशरीरः पूर्णः नचतेनकेचिद्व्यवहाराः तन्मायाव्यापारसमुल्लासयन्पूर्णमपि खण्डयति भावम् तेन
घटस्यात्मनः पटादेश्चापोहनं क्रियते निषेधनरूपं तदेवव्यपोहनमाश्रित्य तस्य घटस्य निश्चयनमुच्यते घट एवेत्येवा
द्वि^ र्थस्य संभाव्यमानापरवस्तुनिषेधरूपत्वात् एषएव परिनिश्चुदे नरणकल्पात्मविच्छेदः द्वीति यतएव तस्माद्घटे त्व्याहे
ल्प^ यी विकाशति अर्थज्ञोकोक्ति वस्तुद्वयेज्ञाकद्वयेन द्वितं क्रमेणोक्तौ यस्मादेवं विकल्पः ततोऽमिति शुद्धविमर्शः न विकल्प इ ति^
ति श्लोकत्रयेण महावाक्यार्थः शाक्येरपि प्रमातुरेवायं व्यापार उक्तः एकप्रत्यवमर्शाख्यः इत्यत्र प्रपन्नेतिस्वयमपि च
वद्भिः सर्वैतैः कथं समर्थ इत्याशङ्कामतत ॥ ३ ॥ नन्वेवमहमित्यपि प्रत्यवमर्शोऽनहंरूपस्य घटादेः प्रतियोगिनोऽपो
हनो यस्यापोहे विकल्परूपता कथं न स्यादित्याशयेनाह ॥ ॥ चित्तत्त्वं मायया हित्वा भिन्न एवावभाति यः देहे बुद्धाव
थ प्राणे कल्पिते नभसीव वा ॥ प्रमातृत्वेनाहमिति विमर्शोन्यव्यपोहनात् विकल्प एव स परप्रतियोग्यवभासजः ॥
अहमित्यवमर्शो हि द्विधा शुद्धो मायीयश्च तत्र शुद्धो यः स चिन्मात्रे विश्वाभिन्ने विश्ववपुषापूरितस्वच्छात्मनि वा अशुद्ध
स्तु वेद्यरूपशरीरादौ तत्र शुद्धेह प्रत्यवमर्शो इति योगिनः कश्चिद्द्योहितव्यः संभवति घटादिदप्रिपकाशसारत्वेनाऽप्र
तियोगित्वेनाऽनपोह्यत्वादित्यपोह्याभावे कथं तत्र विकल्परूपता अशुद्धस्तु वेद्यरूपशरीरादौ भवत् अन्यस्माद्देहा
देर्घटादेश्च व्यवच्छेदनेभवन् विकल्प एवेति वाक्यार्थः ॥ अक्षरार्थस्तु चित्तत्त्वं प्रकाशमात्ररूपं हित्वा सदसंपृहस्तनयाऽ
प्रथानीज्ञान्यभिन्ने देहादावहमेव देहादिनीलादौ प्रमेये प्रमाताऽत्यभिमानेन, यो, हृं, स्थूल इत्यादिविमर्शः सविक ३०

स्य एव न तत्र शुद्धं प्रत्यवमर्शमात्रं अत्र हेतुः परो द्वितीयो देहादिर्घटादिश्च यः प्रतियोगी तुल्यकक्ष्यो न्योन्यपरिहाराच्च
विरुद्धस्तस्य योऽवभासः समारोपणलक्षणस्तस्माद्यत्तोसौ न निषेधात्तु प्राणितोहमित्यवमर्शो जातः अहं स्थूलो
न कृशो न घटादिरिति शुद्धप्रकाशरूपस्यापहस्तनमेव देहादेर्भेदिहेतुः तदपहस्तनेन परमेश्वरस्य स्वात्मप्रच्छा
दनेच्छारूपाभेदाप्रकाशाने भ्रान्तिरूपं प्रतिसा तेच्य रूपामायाशक्तिर्हेतुः चिद्रूपस्य चापहस्तनं देहादेरेवात्यक्तवेद्य
भावस्याभिन्नस्यैव उपपत्तिशून्यतयैव प्रमातृत्वाभिमानः तथा च देहाभिमानभूमिकायां स्थितास्चार्वाकाः
चैतन्य [illegible] विशिष्टः कायः पुरुष इति कायमेव प्राधान्येनाहुः स्त्रीबालमूर्खाणां तथाभिमानात् ततोपि विवेक
वतः पाकजत्वात्तत्परिणामादिवत्त्वात् स्थिरं शरीरं मन्वानाः प्राणशक्तिसमधिष्ठानेन च विना विकारप्राप्तावे
प्राशरीरस्य पश्यन्तो बुभुक्षापिपासायोगयोग्यं प्राणमेवात्मानं केचन श्रुत्यन्तविदो मन्यन्ते ततोपि समधिकविवे
नि^ कभाजः प्राणस्यापि त्वाद् अनुसंधानयोग्यतामपश्यन्तो ज्ञानसाधनाश्रयभूतां बुद्धिमेव करणं दृष्टमतया आत्मा
नमाहुः अपरे तु तस्या अपि योगिदशायां वेद्याभावादपरत्वं मन्यमाना असंवेद्यपदं रूपं यत्न किंचिद्रूपं सकलवेद्यराशि
विनिर्मुक्तं शून्यत्वान्नभस्तुल्यं ननु महाभूताकाशस्वभावप्रभावं तत्त्वं शून्यब्रह्मवादि साङ्ख्यप्रभृतयः आहुः तस्मि
न्नपि वेद्येऽन्यां तरं तत्रापि शून्यान्तरमिति यावदिदं तावत्कल्पनानत्तु रति तदर्थमाह कल्पित इति नचात्र तस्या
परमार्थप्रकाशबलेन सर्वस्यैतः प्रकाशोऽनन्तु देहादिवशान्तथात्वाभिमानमात्रे देहादिः प्रमातेति संकोचमात्ररू
पं चित्तत्त्वे शून्यं भूतलस्य घटाभावः संकोचोपरि विश्वाशाछायापू हितं तु चित्तत्त्वमेव बुद्धिप्राणदेहादीति
भूमीषु च भूमिकाविशेषाणांरोहत्समारोहता योगिनां जाग्रदादितया पि इस्यादितया चामभेमभासते। अपहस्त
नं च व्याख्यास्यते ॥ कलोद्दलितमेतच्च चित्तत्त्वं कर्तृतामयम् अचिद्रूपस्य शून्यादेर्मितं गुणतया स्थित मिति तत्स्य

ईप्र॰
प्र॰ति॰
३८

तमशुद्धोहमित्यवमर्शोविकल्प एव ॥ द्विविधोपि चायमहंप्रत्ययो द्विधा अनुभवमात्ररूपश्चानुसंधानात्मा च ।
शिवात्मन्यहमिति सदाशिवात्मन्यहमिदमिति शुद्धो द्विधा अशुद्धोप्यहं स्थूल इति योहं स्थूलोभूवं सोहं कृशो
बालो युवा स्थविरः स एवाहमित्यशुद्धोपि द्विधा तत्राशुद्धे विकल्परूपत्वमपि तिष्ठमेवेत्युक्तम् । अशुद्धे त्वनुभ
वरूपे विकल्पत्वमुपपादितं अशुद्धे त्वनुसंधानात्मकतया भेदस्य च स्फुरणात्कोपि द विकल्पकलंको केत तस्य व्या
मोहव्यपोहितुमाह ॥ कादाचित्कावभासेया पूर्वाभासादियोजना । संस्कारात्कल्पना प्रोक्ता सापि भिन्नावभासिनि
॥ देहेत्यादिवर्जिते कादाचित्कः कदाचिद्भवो नियतदेशकालाकारोवभासो यस्य देहादेः स्थूलत्वरूपस्य तत्र
यः पूर्वाभासेन बालादिशरीराभासेन योजना योहं बाल आसं स एवाद्य युवेत्यनुसंधानं सा देहग्रहणादुत्तरेण भावि
नाऽवभासेन सह योजनास्य वृद्धो भवितास्मीति सा योजना सर्वा कल्पना विकल्प एव तत्प्रसूतः प्रत्यवमर्शः अ
तद्देहादेर्विशेषणं हेतुत्वाशयेन यतो भिन्नावभासित्वमेव देहादेस्तदानीमप्यविच्छिन्नम् यदि हि तस्य देहादेः
सर्वतः पूर्णत्वमहं स्फुरद्देहीनत्वमपश्यन्ननुसंधानमहमिदमिति विदध्यात्तदिदं सदाशिवभूः केन विकल्पः स्याद्
त्वेनमाणेत यावता विच्छिन्नेष्वेव सोनुसंधिः भिन्नेपि कथमनुसंधानमिति चेदाह संस्कारात्प्राक्तनानुभवच्छि
न्नवासनाप्रबोधजस्मृतिबलादि नियावत् प्राणबलाबलवशादनुसंधिः शुद्धोत्रानन्तलक्षणादिनास्ति तस्मात् पूर्व
वेतन्याऽतन्मयोगात् अयमपि विकल्प एव एवं स एवायं घटः इति घटाद्यनुसंधानेपि विकल्पत्वं मन्तव्यं किंत्वे
तास्वनुसंधानभूमिष्वपि केन विघाशक्तिरचिरयुतिवद्दृह्यत इति नासौ परपदपरिपूर्णत्वेन प्रथमकल्पाभ्यु
पायत्वमस्पुणाराममनुस्वः ॥ न च देहादीनां पूर्वपूर्वप्रमातृवेद्यता येन प्रमातृरप्रकाशो प्रमेयं न भाति तत्प्र
काशाच्च न पूर्वप्रकाशाविनाशोपि न प्रमातुः तत्प्रकाशाविनेपि नवस्यास्यादपि च विशुद्धप्रकाशत्वे विश्वस्य प्रकाश । ३१

इति निरूप्य यदुक्तं पुरस्तात् सदेवस्य स्मृत्यादिषु प्रकाशवियोगोपि भगवत उक्तो भवतीति तद्दर्शयति ॥ तदेवं व्यवहारेपि प्रभुर्देहादिमावि
शन् । भान्तमेवान्तरर्थौघमिच्छया भासयेद्बहिः ॥ यत्पूर्वं दर्शितं देहबुद्ध्यादि तत एव मयुपपद्यते कथम् । यदि व्यवहारे मायाप
दे देहप्राणादिमपि प्रभुरेव प्रकाशः परमार्थ इच्छया मायाशक्तिरूपयाऽऽविशन् देहप्राणादिषु आत्मत्वेन स्वहृदयं प्रदर्शयन्नन्तः सं
विन्मात्रे भान्तमहमित्येवंरूपमर्थौघमिच्छयैव बहिरिदमिति भासयति तत एतदुपपद्यते अन्यथा तन्न वस्यास्यात् देहेनापि द्
अपि प्राक्प्रकाशाद्भिन्नक्रमो । यदेतावदुक्तं तदिति तस्मादेतदेवं जातं त्वदुपमारणम् । किंतत् यत्किल प्रभुः परस्परं व्यवहार
काले च क्रयविक्रयप्रदानव्याख्यादौ चैत्रमैत्रादिसंबंधिना देहप्राणादीनिकतया तावत्याभासत्र्याविशन्ने तद्भान्तमेवान्तु ज्ञेतानः
प्रकाशमेव संतं बहिरेकाभासतया भासयतीति संभाव्यत इत्येतज्ज्ञातम् तेन तेन प्रमात्रा सहैक्यं सज्जाते अन्येन प्रमात्रैक्यं संक्रिय
ते घटादिमात्ररूपे स्थितिः क्रियते पूर्णाभासरूपनिमीलनातिरोभावश्चाधीयते तावत्याभासैक्यावभासेन पूर्णत्वावितरणादनु
ग्रहः क्रियते तेन न केवलं महासृष्टिषु महास्थितिषु महाप्रलयेषु प्रकोपनिरोधनिषु दीव्यत्तानानुग्रहेषु भगवतः कृत्यपंच ६
कयोगो यावत्सततमेव व्यवहारेपि यदुक्तं ॥ सदाशिवविनोदाय सदा स्थितिसमाभासिने सदा त्रिभुवनाहारतृप्ताय स्वामि
ने नमः इति प्रतिज्ञात्तामविश्रान्त इति प्रकाश्यमात्म नियदाप्रकरीकेशेषित्वन्नीरितिच ॥ इहान्तरवभासः स्थित एव तत्किं तत्र क)
रणान्तरचिन्तयेति प्रकृतिं प्रमेयं तात्ति उपपन्निरुक्तो तेन विनेच्छाद्रूपः प्रत्यवमर्शो न स्यादिति तत्प्रसंगात् प्रत्यवमर्शो विकल्प २
दिस्वरूपमुपपादितमिति शिष्याणां धियं समाधाय प्रकृतं प्रमेयमुपपादयन्नुपसंहरति ॥ एवं स्मृतौ विकल्पे वाप्यपोहने
परायतो ह्यानेवाप्यन्तराभासः स्थित एवेति निश्चितम् ॥ प्रकाशात्मा परमेश्वर एव यतो देहादिप्रमातृताभिमानदशायाम
पि वस्तुतः प्रमाता एवमित्युक्तो हेतोरिदं सिद्धं भवति स्मरणापोहनजीविते च विकल्ये नुभवज्ञाने चान्तराभासः प्रकाशाविश्रान्तः
स्थित एव नात्र संशयः कश्चित् यदि देहादिरेव परमार्थप्रमाता स्यात् तत्र शरीरस्य प्राणस्य धियः शून्यस्य वाऽन्तर्घटादीनि न
किंचिदेतत् घटादियविहारेण देहादेः स्थितत्वात् परमार्थप्रकाशस्य सर्वसहत्वात् इति न दत्तविप्लवमित्यनयाऽऽसमिद्धमेतत् ॥
नन्वन्तराभासवर्गस्य बहिराभासनं यदि सर्वत्रास्ति कस्तर्हि स्मरणादावाभासभेदः न चासौ न संवेद्यते स्फुटास्फुटतादि प्रस्फुरण =
स्याऽनपह्नवनीयत्वादित्याशंक्याह ॥ किंतु भेदसंसर्गिकोऽयं नैव बहिराभासनात्मनि पूर्वानुभवरूपस्तु स्थितः संस्मरणादि ।

किंतुनै

देर्निर्विषयत्वं प्रहीत शाक्तित्वं चोद्योत्यते एतदेवास्फुटत्वमिति सिद्धोऽनुभवस्मरणा

ईश्वर प्रति ३२

अनुभवज्ञानस्येदं नीलमित्यन्तराभासं बहिराभासयतः सोऽन्तर्भावाभासो नैसर्गिको निसर्गेः स्वात्म्यादागतो न तु स्मरणादेरि-
वान्यज्ञानकृतवासनादिबलात् स्मरणे तु अनुभवज्ञानप्रभवदाहृत भाविन्यप्येवमायच्चयं तन्नीलाद्यवभासो बाह्यतयावभास-
यितव्यो नासौ स्वात्मीयो यस्तु पूर्वानुभवसंस्कारजोऽसौ । तत्र संस्कारो नाम अनुभवस्य कालान्तरेऽप्यनुवर्तमानता अतोऽसौ
वस्तुवर्तमानोऽनुभवो यतो नीलाद्याभाससंभिन्नस्ततस्तत्तादात्म्यापन्नं स्मरणाद्यपि तथा निर्भासते तत्र च स्मरणकालासं-
भवी स आभासस्तदनुभवपूर्वकालकलित एवेति स्वयं स्मरणेऽवाभासभेदः अन्तराभासवर्गस्य बहिराभासनेन व्यवधानेन
स्फुरता व्यवधानेऽनुत्कालिकत्वाभावादस्फुरतेति ॥ नन्वनुभवज्ञानादेरिन्द्रियिकादन्यत्सर्वं ज्ञानं व्यवधानेन बहिराभासनरूपप्र-
प्रमित्यान्याशेव व्याप्तविभागमाह ॥ स नैसर्गिक एवास्ति विकल्पे स्वैरचारिणि । यथाभिमतसंस्थानाभासनाद्बुद्धि-
गोचरे ॥ ॥ यः प्रत्यक्षव्यापारमनुपजीव न्त्यादि परतया मनोराज्यसंकल्पादिविकल्पः स स्वैरकृत्या स्वप्रेरणे-
नैरपेक्ष्येण स्वातंत्र्येणाचरतु देतित व्ययतेच तत्र योऽबहिरवभासो नीलादिरन्तराभासमयस्य स नैसर्गिक एव तथाहि परिदृष्टशु-
र्वमपि स्मृतं दशाननशतकलितं करयुगलयुक्तं दंतिनं मनः प्रमातृस्थमेव स्थितं बहिरन्तःकरणभूमौ स्वच्छधीदर्पणात्मिकाया
सविकल्पस्तात्कालिकमेवावभासयति ॥ अस्माच्चान्तराभाससंभवसमर्थनप्रसंगागततादात्म्यभेदविचाराद्धेयत्नेया-
गनं मुख्यतयाभिसंहितं स्वात्मनी पूर्वस्य प्रत्यभिज्ञानरूपं तदधिकरणासिद्धान्तनीत्या नाया सा सिद्धिमितिदर्शयति ॥ अत एव
यथाभीष्टसमुल्लेखावभासनात् ज्ञानक्रियेस्फुरत्वेव सिद्धे सर्वस्य जीवतः ॥ यदिदं यथाभीष्टस्य बहिरसत्त्वादननुभूतस्यापि
सम्यगुल्लेखनमवभासनं च विकल्पस्य प्रसंगाद्दर्शितमस्मादेव हेतोरिदमपि सिद्ध्यति यः कश्चित्कीटो ब्रह्मा वा जीवक्रियाविशि-
ष्टस्याभासनरूपा ज्ञानशक्तिरुल्लेखनरूपा च क्रियाशक्तिर्नैसर्गिकी, तत्र तस्यां भूमौ व्यतिरिक्ते स्वैरोपकल्पितसर्ववि-
डसचरूपजीवनसंभावनाऽपि नास्तीति स्वमेव स्वीयं स्फुटं प्रत्यभिज्ञेयं जानाति च करोति चेति ज्ञानक्रियास्वातंत्र्यलक्षणमेक-
वचनेन सर्वस्य जीवजातस्य वस्तुतः पके स्वरूपतां स्वच्छयतीति शिवम् ॥ श्रीमदभिनवगुप्ताचार्यविरचितायां प्रत्यभिज्ञासू-
त्रविमर्शिन्यां व्यपोहनशक्तिनिरूपणं षष्ठमाह्निकं ॥ अनन्तशक्तिरन्तर्नायदेकाप्यद्वैसंप्रयात् विचित्रं चेष्टिको न्यास-
स्त्रिदिरित्नवमः शिवम् ॥ एवं स्मृत्यादिशक्तीनां वितत्य स्वरूपमियता दर्शितम् यत्तु अत्र प्रमातुरपि स्वरूपमुन्मीलितं ३२

तत्रात्मामेव शक्तित्वं समर्थयितुं तद्धि स्वतन्त्रं शक्तिस्वरूपं भवितुमर्हतीति अधुनान्तर्गतासां शक्तीनामेक आश्रयः स च तत्त्वति-
संयोजनवियोजनादिशक्त्युपयोगात्मा महेश्वरो न तु जडस्वरूप एव कुलालादिवद्दारुकपाचकादिशक्त्याश्रयमात्रमिति युक्त-
मयमुपदिष्टं, न चेदं अतः ज्ञानानन्तं विश्वरूपमित्यत्र सूत्रे न हि तत्त्वनिरूपितं किं तत्रैकमाश्रयं निर्णीतं तु यच्चैषा प्रतिभेत्यादि
व्यवहारोऽनुसूत्यते, इत्यं तैश्चतुर्दशभिः श्लोकैराह्निकं प्रस्तूयते तत्र श्लोकेनैक आश्रयः स्वरूपत उपादिश्यते ततो यद्धये
न व्यवहारः सर्वः सत्यकस्मिन्नाश्रये युज्यते नासतीत्यन्वयव्यतिरेकौ तन्नायुक्तिरुच्यते ततो व्यवहारस्वरूपं कार्यकारणभा-
वतः स्मरणतः सत्यासत्यप्रविभागतश्चेति संदिश्य श्लोकेन श्लोकाष्टकेन च प्रतिपाद्यते ततः श्लोकेन सर्वार्थो निगु-
म्यते इत्याह्निकार्थसंक्षेपः अथ श्लोकार्थो व्याख्यायते यदुक्तं सर्वस्य सिद्धे ज्ञानक्रिये जीवत इति तत्कथं यावता ज्ञानादि-
व्यतिरिक्तः कोऽसावन्यो यस्य ते स्यातां कारणादिदिदृक्षयाहि दूषितमस्तदाश्रयः तत्राभिन्नेषु धर्मेषु इत्यादिना, तदेतदाशङ्क्य
दर्शनद्विषा तमेकं स्वरूपत उपक्षिपति ॥ या चैषा प्रतिभा तत्तत्पदार्थक्रमरूषिता
अक्रमानन्तचिद्रूपः प्रमाता स महेश्वरः ॥ प्रतिभाति च इति यद्यपि विशेषोपाधि एवमेव प्रतिभानं भाति तथापि
तद्धि द्वयस्य स्वैकवसुरपि तु संवेदनमेव तत्तथा चकास्ति, मां प्रति भातीति प्रमात्रवलग्नत्वात् तथा चोक्तं न तत्र सूर्यो भा-
ति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति प्रात्याविरतमु-
रणात्वेकर्मप्रवचनीयेन तदीयस्वातंत्र्योपकल्पितनिर्माणक्रिया ज्ञानेतावद्यथा वेदकभावरूपो लक्षणात्मा संबंधो द्योतितः
केवलं विषयोल्लेखनबलाद्धि हि क्रमावभासः समर्थितः सस्क्रमयोगपद्यादिविचित्ररूपायः पदार्थानां वक्ष्यमाणप्रव
रस्वातन्त्र्यरूपदेशकालशक्त्युपकल्पितः क्रमो देशकालपरिपाटी नेतन्नषिता प्रतिबिम्बकल्पनयोपरक्ताया प्रतिभा-
क्ताकेवलं भिन्नसंवेद्येत्यादिना एषेति च, सर्वस्य स्वप्रकाशरूपपरमार्थतत्त्वज्ञानमुखत्वेन प्रकाशमात्रपरमार्थतया भेदाभा-
वादक्रमा सेयं महेश्वरः अविद्यमानोऽन्तः परिच्छेदो देशतः कालतः स्वरूपतश्च यस्याश्चितः संविदस्तदेव रूपं यस्याति अत एव
बहिर्मुखप्रकाशनात्मकवितानस्वभावस्य प्रमाणवर्गस्यान्तः प्रत्याभासमिदमिदमित्यनन्तकल्पाविकल्पमयो विमर्शात्मा
प्रमासमूहः तत्र संयोजनवियोजनविश्रमताद्यनेकप्रकारस्वातन्त्र्यपूर्णः स्फुटोऽहंप्रत्यवमर्शमयः प्रमाता संभण्यते ॥

ई.प्र. प्र.ति. ३३ अन्तश्च बहिश्च घटप्रकाशः अयं घट इत्यन्तर्विकल्पः स्वीकृतसर्वरूपः अहमिति तदुभयविश्रान्तिस्थानमितीयत्पूर्णप्रकाश
स्य स्वरूपम् ॥ अत्रैवोपपत्तिं दर्शयितुमन्वयेनाह ॥ तत्तद्भिन्नसंवित्तिमुखैरेकप्रमातरि प्रतितिष्ठत्सु भावेषु
ज्ञातेयमुपपद्यते ॥ संविन्निष्ठा हि विषयव्यवस्थितय इति यदुच्यते तत् तद्भिन्नरूपप्रमात्रात्मकसंविन्मात्रविश्रान्त्या सिध्यति
अपि तु तास्ता विभिन्नाः संविदो नित्यस्वरूपाः प्रमात्मा नीयमानान्येव मुखानि द्वाराणि उपाया मार्गा येषां ते मुखैर्नदीस्रोतस्स्थानी
येर्धर्मी भावा नीलसुखादय उह्यमाना एकस्मिन्नहमिति प्रमातृरूपे महासंवित्समुद्रे प्रतितिष्ठन्ति आभिमुख्येन वि
श्रान्तिं भजन्ते तत एषु परस्परं समन्वयरूपं यत् ज्ञातेयं तदुपपन्ना घटते ज्ञातीनां भावस्तद्धि प्रवृत्तिनिमित्तं पर
स्परं जानीयुरिति कर्म चान्योन्ययोगक्षेमोऽहमहमिकात्मकं ज्ञातेयं तच्च समन्वयाभिप्रायेणेह दर्शितं न जडानां स्वतः
समन्वयः कदाचिदपि इति प्रतिपादयितुम् ॥२॥ तथा च व्यतिरेकमुखेनैतदेवाह ॥ देशकालक्रमजुषामर्थानां
स्वसमापिनां सकृदाभाससाध्योऽसावन्यथा कः समन्वयः ॥ अर्थानां जडानां तत्तज्ज्ञानानां तत्तद्विकल्पानां तत्
श्रयानां देशक्रमं कालक्रमं चात्यजतां स्वसमापिनां स्वरूपमात्रप्रतिष्ठानां वा समन्वयो न कश्चिदित्यर्थः यतोऽसौ समन्व
यः सकृदाभासेन देशकालाकारमिश्रीकरणात्मना योजनाभासेन साधयितुं शक्यो नान्यथा नहि घटस्य कटस्य कुड्यादीनां
पुस्तोतः स्तलेऽश्यमाना स्तरेणालुपादयः समन्वयैकविश्रान्तीति अनेकत्वेन देशादिभेद इत्याशयेन सकृत्तत्त्वेन सन्निधापिता तत्
येण प्रयुक्तः ॥ तत्र कोऽसौ समन्वय इत्याशङ्क्य बहुतरव्यापकं कार्यकारणभावं तावद्दर्शयति ॥ प्रत्यक्षानुपलम्भानां
तत्तद्भिन्नांशपातिनां कार्यकारणतासिद्धिहेतुतैकप्रमातृजा ॥ इहाग्निप्रत्यक्षे धूमं नोपलभते ततो धूमं प्रत्यक्षेणापश्यति
अग्नौ तदपि यदि नोपलभते धूममपि नोपलभते इति प्रत्यक्षाभ्यामनुपलम्भपञ्चकेन कार्यकारणभावो धूमाग्न्योः सिद्ध्यतीति
यदुक्तं तत्कस्य अग्निप्रत्यक्षेण हि धूमेन किंचिदज्ञातमग्निज्ञानेन धूमज्ञानं ज्ञानस्यागमहेतुत्वात् स्वस्वभावरूपे भिन्ने
विश्रान्तत्वाच्च परविषयानवगाहनात् ज्ञानानां तत्स्वरूपानावेशाच्चेति पातिनामिति पतनवाची पतिश्च विश्रान्तिवाची प्रयुक्तस्तेन
एवं धूमानुपलम्भादौ चतुष्टयेऽपि वाच्यं तत्पश्चादग्निधूमाभावः धूमाग्न्यभावः धूमाभाव इत्येतानीव स्वस्वनियतान्यपि यथा प्रत्यक्षमा
तृसंवेद्यानि धूमाग्न्योः कार्यकारणतां गमयन्ति तथा एकप्रमातृवेद्यान्यपि विकल्पोऽप्यनुभवातिरिक्तो नायं प्रमाण ३३

मेव यदा प्रत्यक्षानुपलम्भास्ततः पञ्चकेन तानि पञ्च वस्तूनि एकसंवित्समुद्रविश्रान्तानि ज्ञातानि तदा एकीभूतानि प्रमा
तारं तं तथा त्वन्योन्यसापेक्षाणि न त्वेवं घटपटादिवज्ज्ञानं स्वयमेवैकाभासः कार्यकारणभावावभास इति न किंचिदव
द्यम् ॥ ननु प्रत्यक्षानुपलम्भैर्यत्कृतं तत्स्मरणबलादेकीकरिष्यते उक्तं चैतदत्र स्मृतिरप्यनुभूतातिरिक्तैवं तथापि
यते सापि च विज्ञानसमन्वयरूपा एकप्रमातृसङ्गं विना कथं स्यादिति दर्शयति ॥ स्मृतेरपि च स्वसंवित्तिः प्रमा
णत्वासंभवे पूर्वानुभवसङ्गादेषा धत्ते सैव नापरम् ॥ इह ह्यनुभूतो विषयः प्रकाशते स्मृतौ तत्र विषयस्पर्शि
स्मृतिर्न नूतनः प्रकाशः अपि तु स्वप्राच्य एवानुभवप्रकाशः स चानुभवो ज्ञानान्तरे पतेन ज्ञेयरूपत्वाभावात् ज्ञानान्तर
संवेद्यः अपि तु स्वप्रकाशः स च स्मृतिकाले यद्यसंस्तत्कथं प्रकाशतां भवतु वासौ तथापि स्मृतिप्रकाशोऽनुभव
प्रकाश इत्यन्योन्याभिन्नयुगलमिति न कदाचित् स्मृतिः स्यात् तस्मादेतदेवमुपपद्यते यदेव स्मृतेः स्वसंवेदनं
तदेवानुभवस्य स्वसंवेदनं न त्वपरं स्वसंवेदनव्यतिरिक्तं प्रत्यक्षमनुमानादिकं वा तत्र क्रमते तत एव तावत्का
लव्याप्यविच्छिन्नमेकं यत् स्वसंवेदनं तदेव प्रमातृतत्त्वमिति सिद्धं अन्यत्रानुभवितरि स्मर्तान्यो नोपपद्यत इत्यनु
याच्छायया स्मृत्या प्रमातृसिद्धिः पूर्वमुक्ता इदानीं स्वसंवेदनैकीभावनभङ्ग्यन्तरेणेति विशेषः ॥ नन्वनुभवातिरि
क्ते [illegible] संतु विकल्पाः प्रमाणं अप्रमाणं हि बाधकबलाद्भवति बाधाभावे तत्कथं स्यादित्याशङ्क्य
याप्ययं बाध्यबाधकभावः सत्यासत्यप्रविभागनयात् विश्वस्य व्यवहाराणां जीवितभूतः सोऽनेकेन प्रमात्रा तत्त्वेन विना
घटत इति वितत्य दर्शयति ॥ बाध्यबाधकभावोऽपि स्वात्मनिष्ठाविरोधिनां ज्ञानानामुदियादेकप्रमातृपरिनिष्ठितेः ॥
बाधाभावे प्रामाण्यमित्येतदर्थमवष्टभ्य समर्थ्यो यो बाध्यव्यवहारः सोऽपि कथमित्यपि शब्दस्यार्थः इह शुक्तौ तावद्रज
तस्य न काचिद्बाधा नाम क्रियमाणा दृश्यते शुक्तिज्ञानेन रजतज्ञानं बाध्यत इत्यपि न युक्तं स्वस्मिन्स्वविषये आत्मनि स्व

ईप्रव·
प्र·भि·
३४

येद्वयोर्ज्ञानयोः परिनिष्ठितयोर्विश्रान्तयोरन्योन्यं विरोधस्याभावात् अध्यायमेव विरोधः परस्परपरिहाररूपः तर्हि
सर्वेषां ज्ञानानां विरोधाद्बाध्यबाधकभावस्य परिनिष्ठितत्वं लभ्येतेति सुतरां विच्छेदेन सत्येतरप्रविभागः तत्राप्युक्तं तत्रे
णाख्यायि एतदुक्तं भवति यदि ज्ञानं स्वयं न ख्याति तदा किं ज्ञानान्तरेण तस्य कृतं न हि तेन तत्काले संभविता
त्रस्य विषयव्यवहारः कांतिमूर्त्या वा यः नरजतमित्यपि ज्ञानं स्वरजताभावविषयीकुर्वन् न विषयमपहरेद्रजतज्ञानस्य ॥
अथापि ज्ञानान्तराणां तरेण नश्यन्त इत्यपि पक्षः तत्रापि सर्वेषां ज्ञानानामियमेव सरणिरिति किंचिदेव बाध्यमिति कथं
स्यात् यदा तु रजतज्ञानं शुक्तिज्ञानं चैकत्र स्वसंवेदने विश्राम्यतस्तदैतदुपपद्यते तथा ह्येकत्रापि प्रमातृतत्त्वे
विश्राम्यतां ज्ञानानां नानेकप्रकारैव विश्रान्तिः रपि तु विचित्रतयैव सा संवेद्यते तथा हि नीलमित्युत्पलमिति ज्ञा
ने प्रमातरि विश्राम्यती परस्परोपरागाभासेन विश्राम्यतः घट इति पट इति परस्परानाश्लेषेण शुक्तिकेति न रज
तमिति ज्ञानस्योन्मूलनं तदीयविमर्शात्मकप्रमातृरूपव्यापारानुवर्तनविध्वंसं कुर्वत्प्रमातरि प्रतिष्ठां भजते, ए
वं कार्यकारणभावादौ विश्रान्तिवैचित्र्यं प्रमेयासंभवि प्रमात्रा स्वातंत्र्येण निर्मितं न तु प्रमास्यप्रमास्वतंत्रं तो
दार्थवाच्यम् एवमेकत्र प्रमातरि पूर्वज्ञानस्य परिवर्जनेन, यतो निश्चिता स्थितिरतो बाध्यबाधकत्वव्यवहार उपप
न्नः नीलादिव किल ज्ञानयित्वा व्यवहारान्सर्व परमेश्वरः स्वातंत्र्यादाभासयति तन्नापि सत्यापवेति ॥ अत्र
परकीयमतं आशंकते दूषयिष्यामीति ॥ विविक्तभूतलज्ञानं घटाभावमितिर्धीयथा तथा चेच्छुक्तिकाज्ञानं
रूप्यज्ञानाप्रमात्ववित् ॥ इह शुक्तिज्ञानं स्वात्मानं संविदन्स्वात्माभिन्नं प्रमाणं बुध्यत इति तत्परिच्छिन्नमिति न्यायात् तत्प
रिच्छेदनान्तरीयकत्वान्यव्यवच्छेदस्य, शुक्तिज्ञानरूपस्य रजतज्ञानस्याप्रमाणत्वं वेदनं तदेवोच्यते यदेतच्छुक्तिकासंवे
दनं नचेतद्रूप्यविषयद्वयं तत्तज्ज्ञानमेव तदन्यतराभावज्ञानमिति शुद्धभूभागग्रहणमेव हि घटाभावज्ञानमिति प्रसिद्ध मिति
३४

एवमप्रमाणसंवेदनमेव रजतज्ञानस्य बाध्यत्वमुच्यते अतश्च बाध्यबाधकत्वमेव सिद्धमिति चेदत्राभिह ॥ ॥
न्यते तत्किं प्रमात्रैकेनेति ॥ अत्र प्रसंगादभावव्यवहारस्य सिद्धौ तत्त्वमुपपादयिष्यन् दृष्टान्तमेव तावत्पर
दृष्टानेन दूषयति ॥ नैवं शुद्धस्थलज्ञानात्सिद्धं तस्या घटात्मता न तूपलब्धियोग्यस्याप्यत्राभावो घटात्मनः ॥
योऽयं दृष्टान्त उक्तः परेण कृत इति चेदुच्यते इह भूतले न घट इति तादात्म्येनाभावो व्यवहर्तव्यः कदाचित् कदाचि
द्व्यतिरेकेण इह भूतले घटो नेति तत्र शुद्धभूतलज्ञानादाद्योऽयं व्यवहारः सिध्यति यत्र हि रूपत्वेनोपयोगि
उपलब्धिलक्षणप्राप्तिरपि हि यस्य नास्ति पिशाचादेः स्वभावविप्रकृष्टस्य वा पश्चादेस्तु कर्कशत्वादिसामग्री
साकल्पस्य नचैकज्ञानसंसर्गिवस्तुतत्प्रतिपत्त्यभावेनानिश्चयात्तस्यापि तादात्म्येनाभावो व्यवहार्यः भूतलं न
पिशाचो न प्राणा इति, यत्र तु रूपत्वं विप्रकर्षणमवश्यमुपयोगि तत्र व्यतिरेकेणाभावो व्यवहर्तव्यो, ननु सोऽनुपायः
द ॥ दीर्घवक्रतोर्ध्वमुरुगुरुमच्चैस्ततादिभिः यथाभासा विभिद्यन्ते देशकालाविभेदिनः तथैव सूक्ष्मदृष्ट्वा काञ्चनोज्ज्व
लत्वादयः आभासभेदाभिन्नार्थकारिणस्ते पदर्शनेः ॥ इह तावदेकस्मिन्नपि चैतनतया प्रसिद्धपुरुषस्वलक्षण
दृ. वितत देशव्यापिना दीर्घत्वमेव कदाचिद्विदृश्यति यातत्क्षणमपि निःसंधिवैपद्यपता वा झटिति याप्रि लाभा
मपि संभविनी गत्यं दिगाक्रमणरूपं वा ऊर्ध्वतो यास्याणोरपि संबंधिनी गमनागमनादिस्वतंत्रभावयोरुपतानुपपुरुषत्वेन
दृ. यदन्यपुरुषसाधारणम् तथाहि स्वतंत्रयावास्तव्यापृति [illegible] पयापवमुक्तम् यथोक्तं यातव्या [illegible] देपसारत्वाच्चेत
सः स्वरसोद्गताइति विततदेशव्यापिनएवार्थातिरोपिलक्षणमर्थक्रियासमर्थ्यमानो विभज्जेदेव व्यवहारेहेदं दी
र्घं दीर्घत्वनाम गीयतेइति व्युत्पत्त्यमानो व्यवहारयितभिज्ञा विभागं कुर्यात् इत्येवं तत्राभासानां भेदः एकस्वलक्ष
णत्वेन एकस्मिन्देशाभासे कालाभासे च विश्रान्तेः देशकालाभासावेव हि सामान्यरूपत्वप्रयोजकव्यापित्वानि
त्यत्वविरुद्धताविधानसविधहर्षी विशेषरूपतां वितरतः एवं पुरुषत्ववदन्यापि ब्राह्मणत्ववभासाभ्युपनिरूप्याः एवम
नावत्प्रसिद्धतराभासभेदोजडाजडसाधारणवक्तव्यधर्मीस्पष्टत्वात् अनेन निदर्शनेन भूमेरपि भूमत्वचंदनत्वश्लोकेवपे
तच्चेदनोपितत्वादयः प्रसिद्धाभासभेदा विभजनीयाः अनेनतत्प्रसिद्धेनदृष्टांतेनाप्रसिद्धभागोपियोच्यस्तत्राप्या
भासभागभेदो भवति तथाहि किंचिदपयञ्चनास्तीति निर्दिष्टं गामिवाप्यायमानो घटं पश्यन्नसौ घटमिति सत्त्वाभासमेव
पश्यतिस्वरूपरानाभासाज्ञाप्यायिततनाङ्ग्यते तथा [illegible] दृक्कादृश्यमणाय्याचाभासम् स्वतंत्रनयना नयनुयोगएवस्वर्थी
द्रव्याभासं तुलायर्थी कांचनावभासम् रथनार्थी गौज्ज्वल्याभासम् आदित्यह्रणाद् [illegible] तरभावार्थी दाढ्याभास ५९

उ. ३. [illegible]

मित्याभिदृष्टव्यम् एवं कविव्युत्पत्त्योरपि योजनीयम् एवमेतत्राभासभेदा एव वस्त्वाभासमानतासारत्वाद्वस्तुतायाः
योग्याभासस्यज्ञाणश्वतो विमर्शस्यापि यत्त्वाभासमेवमाश्रयस्याभिजल्पात्मनो बोधजातिवितप्रत्यक्षपत्याभासमेव विश्रा
न्तः मक्वेलोहितइत्यादि अर्थक्रियाकारित्वमप्यन्वयव्यतिरेकाभ्यां पत्याभासमेव नियतं सदाभासेन हृदयपरि
ग्रहमात्रस्यासंपादनम् तत्राभासाविशेषेऽपि तस्यार्थक्रियायां साध्यायां मात्राभासस्यैव तदाभा
येन. सनान्तरीयकत्वेनाभासान्तरस्यापि प्रनियतस्यापेक्षणात् एवं येन रूपेणार्थो विचार्यते तेन तेनाभासमात्रा
त्मैव तत्रैव प्रतिभासनात् हि मर्शनादर्थक्रियाकारणत्वमिति प्रसिद्धम् एवं प्रसिद्धतरप्रसिद्धाप्रसिद्धताश
येनेकापर्यायग्रंथकारेणत्रयं निरूपितः दीर्घहमिति भूमेति मर्कटोगिच नन्वेवं प्रत्याभासमेव वस्तुत्वे एके
घटात्मा न वस्तु स्यादित्याशंक्याह ॥ आभासभेदाद्वस्तूनां नियतार्थक्रिया पुनः सामानाधिकरण्येन प्र
तिभासादभेदिताम् ॥ आभासस्यामिश्रयरूपत्वेनावश्यं कश्चिदाभासः प्रधानत्वेनान्याभासानां विश्रान्ति
पदीकृतस्थः सत्तेषां समानमधिकरणं तेन सह हृदयस्तेषां संबंधस्तत्सामानाधिकरण्यम् तेनोपलक्षितो यः प्र
नृ. तिभासोऽर्थोस्तुवः प्रकाशस्तत्र तु प्राणिकस्य कस्यचन पदात्मा परामर्शः तस्य सर्वस्यैकाभासविश्रान्ततानि
यमात् तस्मात्सामानाधिकरण्याभासं समनुप्राणयति वाक्यात्मा वा कार्यपरामर्शरूपो विमर्शोद्देहाती
मेघवदासीत्येवं रूपः ततो हेतोर्यद्भेदिनः एतत्सलक्षणानां भावाः न च स्वरूपभेदमन्तरं तत्तेषामन्यापि विशि
ष्टार्थक्रियासमुदितरूपा अर्थक्रियाभासविमर्शभेदेपुनरन्या नियता एकैकमात्ररूपाभासप्रतिभासभेद
प्राधान्यस्तत्त्रेविमर्शोप्यादिमः मन्तव्यः पुनः प्राधान्यविशेषद्योतकः कः कालिवडभयत्रयोज्यः वक्तृवचनेनपेकः

ई॰ ही॰ ५॰ पिस्वरूपभेदापरित्यागात्। ननु चैकस्यावभासे परस्तेन्द्रसपृथक्त्वं यद्याभासानां तदा समानरूपव्यक्तपरंजकत्वेनपा
रमार्थिकं सामान्यरूपत्वम्। घटाभासस्य तत्र शुद्धस्य स्वतन्त्रपरामर्शयोग्यतामात्रेण सामान्यरूपता न वस्तुतः। इत्था
दत्यो हि सर्वः पदार्थः परतन्त्रतासारः एवमेकोपि घटाभास्यपि सत्यमेव आभासविमर्शार्थक्रियाबलेन ता
पावस्थापनादिति ननु नैकेनैव कार्यक्रियातत्रापि नाभाससमुदायात्। अर्थक्रियासमुदाय एवाभासास्ते भिन्ना
अपि यथैकामर्थक्रियां कर्त्तुं मिश्रीभवन्ति तदाकर्त्तृत्वेनाप्युपतावधिमिति चोद्यमपवदति ॥ पृथग्दीपप्रकाशा
नां स्रोतसां सागरे यथा अविरुद्धावभासानामेककार्ये तथैकधीः ॥ पृथग्वर्त्तिनो याः प्रदीपस्य प्रभाः स्व
ल्पतरार्थावलोकनसामर्थ्यादातन्वन्त्यसमर्थक्रियां न कुर्वन्ति ता एव एकभवनाभेन न संमूर्च्छिता स्थानेऽवि
रुध्यन्ते न तत्रार्थक्रियाणां समुदायोस्ति सागरस्य निम्नाविचरितानां स्रवन्तीनां जलानामर्थक्रियाकारीणि तद्व
द्वाः कांचनालोहितस्तनो यथाविलिंगाम्भिरः समावर्जनोचितसलिलाहरणार्थक्रियाचितो द्रुममात्रमेव ती
अप्रतीतिलक्षणार्थक्रियाकारीति सिद्धमेकार्थक्रियाकारित्वम् यत्पुनराभासानां मिश्रणे कारणमिति तत्रोच्यते
येषां सविरोधस्तथावभासा मिश्रीभवन्ति न हि रूपाभासो माधुर्याभासेन मिश्रीभवति विरोधात् सोपि च निया
तशक्त्याश्रयाभिः। पृथग्ये दीपप्रकाशास्तेषां संबंधियदेकं सागरे स्रोतसां यदेकं वस्तु तेन कार्येण यथायेकधी
स्तथा अविरुद्धा ये अवभासाश्च हत्वालोहितकांचनास्तेषां संबंधियदेकं स्वलक्षणं तत्कार्येणैकधीरिति संबंधः ये
कधियाप्रतिभासा विमर्शार्थक्रियाचेति स्वीकृतस्य ननु चैवं प्रत्याभासं प्रमाणस्य विश्रान्तत्वाद्रूपाभासे मितानुप्र
माणं भ्रमतानेन भ्रमाभासमात्रे कार्यकारणभावाभासोपि तावन्मात्रेतत्र भ्रमाभासोप्यग्न्याभासे व्यभिचरेदि ५॰

त्या॰
त्यादिवक्तुरेपत्सव प्रमेयातिशेकोव्यपोहरिहमुमाह ॥ तत्रावसितेव द्विकार्यकारणतोक्तता तत्र तत्रार्था
ताद्यात्म्यप्रमाणादेकतामतः ॥ ननु तत्प्रत्याभासं प्रमाणं विश्रान्त्यतीत्यस्मिन्नपि पक्षे न कश्चिद्दोषः तथा हि
विषिघ्नोपि वह्न्याभासो देशकालाभासप्रभृतिराभासैरसंकीर्णत्वेन सामान्यमात्ररूपत्वाद्यथापि स एवाभा
सो यावद्विराभासैरविनाभूतो भगवत्यानियतिशक्त्यानियमितस्तावत्तोवभासान्स्वीकृत्यैव प्रमाणकृतां निश्च
यपदवीमवतरतीति तत्र वह्न्याभासं धूमकार्यताभासेन धूमकारणताभासेनोष्णत्वस्वभावताभासेन च स्वाभा
विकाव्यभिचरितसाहचर्यः प्रतीयमानोविश्वस्यैव संदेवच तथा प्रतीतो भवत्येकत्वात्तस्य अग्न्याभाविकोपि यः
स्वभावः पुरुषकृतसम्यगादिसु वह्निग्रहीतस्यद्याग्निशब्दवाच्यत्वेन च दृष्टान्तिपादिकारित्वमित्येवमादिः सोपि कृत्या
त्वादेवनिश्चीयते तस्माद्धि प्रमाणतः कृत्रिमेणान्तरेणावात्रयेणाभासान्तरनान्तरीयकत्वयासवह्न्याभासः संविदितः
सर्वदेशकालगतः तथैवासंविदितभ्रतिन्तरंकितस्य प्रमाणान्तरेण तस्य तस्य यथेक्रपुरुषसमयेन नियुज्यमा
नस्य शब्दस्यार्थोज्ज्वलज्वालाकाराभासत्वेनेन नियतिशक्तिरेव सर्वत्र शरणमितिपिष्टनयति एतदुक्तं भव
ति यत्किंचित्कृत्रिममितत्वत्वाभावाभासस्याभासान्तरेणानान्तरीयकत्वं प्रतिभातितत्र नियतिशक्तिमात्रमेव पर
विजृम्भते तन्नु नियतिशक्तिरूपं सर्वाधारवितत कालेऽपि न कार्यत्वे धूमकारणत्वेऽस्वभावत्वे चावभासमानेश्वन
निविरुकालत्व वह्न्यादिशब्दवाच्यत्वाभासादावितिविशेषः ततश्च नियतिशक्त्युपजीवनेन धूमाभासोग्न्याभा
साव्यभिचारीति न कश्चिद्विप्लवः कार्यकारणतोक्तनाचतद्व्यतस्य शब्दस्यार्थतातत्वेक्रद्वाभिधेयता अदिग्रह
णाद्यवसम्बन्धतापूर्वदिक्तयोगिताजलविरोधिता च इत्येवमन्तम्यग्नात्मा स्वभावो वह्नेः दोसपकस्मादेवप्रमा

ई॰ णात्मनः संविदित इति यावत् अर्थैक्ये द इति का व्येये समयः नग्रेथे इति द्वितीयतृतीयपादयोः सामस्त्येन दोषः
टी॰ पृथग्भावप्रत्ययप्रयोगो वस्तुतः पेक्षानपेक्षातः कृतकत्वाकृतकत्वाभ्यां वर्गभेदं सूचयितुं एवं भावस्व
५१ भावव्यवस्थापनं प्रत्याभासं विश्रान्तिनैकेनैव प्रमाणेन क्रियते तेषामप्याभासानां यथाचितं यदन्योन्य
नान्तरीयकत्वं तदेकेन संवेदनरूपेणानन्तदनेकप्रमिताभासविषयपूर्वप्रवृत्तसंवेदनकलापानुप्राणकान्तर्मु
खस्वरूपेण निश्चीयते तेष्वेकाभासमात्रेण संधानरूपं प्रमाणं अनुसंधीयमानेषु तत्त्वाभासेषु गृहीतग्राहि
त्वादप्रमाणम् तत्र तत्प्रत्येकं प्राच्यमेव प्रमाणम् भावस्वभावव्यवस्थापनात्मकमानसप्रवृत्त्यतिरिक्त
कायप्रवृत्त्युपयोगस्तु यथा प्रमाणविषयस्तं प्रकारं दर्शयितुमाह ॥ मातृदेशादिकाध्वान्तरभिन्ने स्व
लक्षणे तत्कालिकी प्रवृत्तिः स्यादर्थिनः ॥ बाह्या तावदर्थक्रिया स्वलक्षणात् स्वालक्षण्यं च देशका
लाभासयोजनस्यैवानन्तरागतम् तत्रापि च विशेषरूपतापि परामर्शं विना न किंचित् परामर्शद्वारेण तु प्रमा
तरि विश्राम्यति प्रमातुः संवेदनैकरूपस्य देशकालयोगयनेक्यादप्यन्यत्वमेव विशेषरूपता मितिसर्वत्राह्य
परमार्थतः तथापि तु या विशेषरूपता भाति तस्याः परमेश्वरस्वातन्त्र्यमेव निमित्तं यत्तन्मायाशक्तिरित्युच्यते तत्र
विशेषसाध्यार्थक्रियाविशेषेण योर्थी तस्य यास्वलक्षणे तस्मिन् विशेषरूपेर्थे तत्कालभाविनी वा मनःकाय
प्रवृत्तिः सा देशाद्यादिग्रहणात् कालस्वरूपान्तरे स्वरूपान्तरे संधानादौ यान्त्यप्यन्तरायाणि वरूप्यनिवृत्त्यन्तराणि ते
षां भिन्नभेदे निमित्ते सति भवति नान्यथा नयकैककृतः प्रमाणं त्वा प्रवृत्तिरपि तत्प्रमाणसमूहादेव समूहता
च परस्पनापपन्ना अस्माकं तु एकस्वसंवेदनविश्रान्तिमयी सा युज्यते इत्युक्तप्राक् न चैवं तत्कृतेन्यत्र इयमे ५१

वच मा प्रमाणानां योजनाच योजिका युक्तिरित्युच्यते गंधुरूप्यादिषु किवत् एवं प्रत्यक्षसमूहादेव प्रवृत्तिरिति तात्प
र्यम् देशादिकेषु प्यादेषु देशाभासादियोजनायामपि तः प्रमातरि भिन्ने यत्स्वलक्षणं तत्रैतिवासंगतिः देश
दिके रध्वान्तरै भिन्ने प्रत्यक्षीभूतैराभासान्तरैभिन्ने स्वलक्षणे निमित्ते सति प्रवृत्तिरिति वा योजना अत्रापि प्रमेयचक्र
त्वनिरूपण [illegible] दिशा तत्तत्याथित्वेनाभिधीयमानः प्रमाणसमूहो निमित्तत्वेनोक्तो भवति ॥ ननु किं
प्रत्यक्षामेव प्रवृत्तौ प्रमाणसमूह उपयोगी नेत्याह ॥ अप्यनुमानतः ॥ न केवलं प्रत्यक्षतः प्रवृत्तिर्देशादिका
ध्वान्तरभेदरूपप्रमाणसमूहान्निमित्ता यावदनुमानतोपि तथ्यवभासाभासमात्रे प्रत्याभासमात्रेप्समस्याप्याभा
साव्यभिचारित्वे पर्वताभासे च यानि प्रत्यक्षान्तराणि यच्च तद्गृहीतातिरिक्ते प्रयोगाच्यवच्छेदप्रसिद्धेत्येवं भूतेष्वप्य
गतमानप्रमाणं तत्समूहादेवार्थिनस्तात्कालिकी प्रवृत्तिरिति संबंधः एवं विमर्शबलादेव भेदाभेदव्यवस्था
नदेव हि परमेश्वरस्य स्वसंवेदनात्मनः शिवनाथस्य मान्यप्रशक्तिविजृम्भितं तत्तु कम्पेरंयदुच्यते इत्यतिकांदाख्यस
भेदश्रितं तदप्युपपद्यते नान्यथा कथंचिदिति निरूप्यते ॥ इत्यातिक अन्यथा यथा तापरोक्षात्ताध्यक्षतात्मना वाह्यान्तरतया
दोषे व्यंजकस्यान्यथापि वा भिन्नावभासच्छायानामपि मुख्यावभासतः एकप्रत्यवमर्शाख्यादेकत्वमन्विवारितम् ॥
प्रतिभासमात्रेणाव्यवस्था उक्त्वा तत् कथं हृताहतयोर्वस्तुनोरभेदः प्रतिभासस्य सकलाहृतानाहृतादितया यथा कथं
चिदपि भेदात् ननु विमर्शोपि प्रत्याभासं तत एव भिन्नः सत्यम् तथापि तत्परोयो विमर्शः स एवायं पटोयं इत्येकप्रत्य
वमर्शत्वेन प्राणितकल्पेन प्रासमं तात्त्व्या तेप्रथने यस्य मुख्यावभासस्यैकरूपभावावभासस्यैकप्रत्यवमर्शेन
इव तेनापि तस्यैव एकत्वभासः आभासविमर्शयोरन्योन्यमवियोगात् ममान्मुख्यावभासादेकत्वमप्रतिहतमाले

ई॰ यदेवानुमितंतदेवदृष्टमित्यत्रप्रत्यक्षपरोक्षताद्रूपेणात्मनास्वभावेनभिन्नाप्यवभासच्छाया द्वयोरवभासो येषाम् ते
प्र॰ षामेकत्वंमुख्यावभासतएकप्रत्यवमर्शानुप्राणिताद्वितिसंगतिः वाह्यांतरतयाभिन्नावभासानामैक्यंयथायदेव
५२ दृष्टंतदेवाहंस्मरामीतिव्यंजकानांदीपालोकादीनांदोषैर्भिन्नावभासानामैक्यंयदेवरक्तोत्पलंदीपेननीलंदृष्टं
तदेवसूर्यांशुभिर्लोहितमेवपश्यामीति अन्येनापिवाप्रकारेणेंद्रियापाटवादिनाएकपार्श्वस्थस्वलक्षणादिनांवा
येषामवभासच्छायाभिन्नातेषामपिसम्यक्प्रत्यवमर्शाख्यानुवर्त्यवभासस्वरूपवलादैक्यमेवेतिस्थितम् ननुकृताद्
वाह्यवस्तुसपदार्थः प्रमाणव्यवसितार्थक्रियोपयोगात् वाह्यांतरत्वादिकथमांतरस्यार्थक्रिया
याप्रमाणव्यवसितायाअनुपयोगादितिशंकितिदृढतमाह ॥ अर्थक्रियापिसहजानार्थानामीश्वरेच्छया नियत
माहितेनास्यानाक्रियातोऽन्यताभवेत् ॥ १२ ॥ इहकार्यकारणतोक्तनाउन्यत्स्वरूपमिवार्थक्रियापियाम
पेक्षणीतासासहजार्थस्वरूपभूतानभवति तत्कारित्वंहियस्मादीश्वरेच्छयानियतंभवनेचाभवनेचयत्तो
नैषांस्वरूपंतेनतस्याधिकरणत्वेतोभावस्यान्यत्वेनाशंकनीयं स्वरूपभेदाद्धिसंभाव्यतान्यत्वेनचस्वरूपमर्थक्रि
याकारित्वमित्युक्तवदन्यतेचवकुशः स्वरूपंचप्रत्यवमर्शवलादेकमेववाह्यांतरतादावपीति १२ ननुविमर्शवा
लादेववस्तुनोयदिभेदाभेदव्यवस्थानर्हीदानीविज्ञानातिनिष्ठमाभ्रांतिसंकथाः शुक्तिकायामपिसत्यरजतंते
वापद्यते इदंरजतमितिविमृश्यमानत्वात् ततश्चभ्रांत्यभावेवाधानुपपत्तिः किमर्थमिदमुक्तम् इतिवस्तुन्य
वाधितेतिव्यभिचाराभावेहिद्रव्याधितेनस्माविश्रांतस्याप्युच्छेदेतलभ्यतेउन्याशंकातिरस्यति ॥ रजतैका
विमर्शोपिशुक्तौनरजतस्थितिः उपाधिदेशासंवादाद्दिचंद्रेपिनिभान्यथा ॥ इदंरजतंस्थिरसर्वप्रमातृसाधा ५२

रणंसूर्यक्रियायोग्यमितिइदमंशेरजतांशेशुक्तमेलनांशेचाभासविमर्शवलान्नतावत्किंचिल्लिख्यातम् किंतु
नरकालेयाभविष्यतिविमर्शानेदंरजतंस्थिरप्रमातृगम्यमभिमतकार्यकारीतितदिहविमर्शविमर्शनीयंयत्तत्त्ववि
मर्शकालसम्भवितद्रूपमेव तत्रास्मिन्नेवविमर्शकालेनावश्यपते भांधचनेतामर्शोनीयेननचेवकालेनेदंरजतं
मभूदितिसत्वरःपरामर्शः नहिज्ञप्रत्यस्तमितायांशनकृतायामिवेदानीमेवेदंनेतिविमर्शः ततोयावता
शर्णेनरूपेणप्रख्यातमंविमर्शप्रयंतेतावत्तन्नप्रख्यातीतिरूपेणाख्यातिरूपाप्रख्यातिरेवभ्रांतितत्त्वेनदृष्टोनासहि
परीतानिर्वाच्याहिख्यातयोप्युच्यतानाम् नतुसत्यरूप्यतानमपापूर्णाख्यातिः ततस्तर्हिकिम् इदमतःसर्वभ्रां
तिरित्याराध्येन विद्याहहिसन्मिमीलिषत्याशृष्मतः मायापदंहिसर्वभ्रांतिःतत्रापितत्स्वमेस्वमेउवगाडेउ
स्फोटउवायरेयभ्रांतिरुच्यते अनुत्सन्नवितस्यापिविमर्शस्यास्थैर्यात् अनुत्सन्नविप्रयोगेदताप्यासेषुनकाचन
भ्रांतिर्मेलनांशेनविमर्शोनिर्मूलनेनविमर्शोदयकालादेवासम्भवाधकेनक्रियतेइतितन्नैवभ्रांतिभावइतिसि
ॐ द्दम् रजतस्यशुक्तिकयासहयदैक्याविमर्शः तथापिमृतोरजतस्यतेनत्वातेनयादृग्नास्थितिरिदंरजतमिति
सानयतः उपाधिरूपोदेशोअरजतमितिरजतस्थायामात्मनाउपरंजयंशुक्तिदेशात्तस्यासंवादात्तस्याविमर्शा ॐ
तद्रूप्याभासनेसंवेदनवदिरजभासनविषयःतस्याभावात्कारणात् ननुभवत्वेवमालिकारणातेद्विचंद्रज्ञानेत
ॐ द्वैचंद्राविताभासंशुक्तिकयेवमेलनंनकेनचित्साकमाभासते यत्रवोवाधस्यात् एकाभासोशेचनवाधश्यत्
भवत्येव कथनदाह मेलनंनकेनचित्सहेति एवंहिसतिस्वालक्षण्यात्...कालनेवाकथमाभासः तदेषा
कालाभासदहतत्राप्यस्तिमेलनाभासो यदिमर्शोनिहन्तिनिरुच्यते द्विताभासचंद्राभासयोरपिमेलनाभा

ई॰
टी॰
५३

सेविमर्शानुवृत्तिव्यावर्तनेनेवाच्यम् तदेतदाह स्थिरूपे च देशेन केवलेसन्तत एव भासविदेशविशेषः कश्चिदन्यथेति हि
चेद्भावरूढो योऽवग्रहः स तत्रयोति बाधकेनोन्मूलितप्राच्यविमर्शानुवृत्तिकः क्रियतेइति एवमाभासासन्मेलनेच
नियमावस्थापितमित्येतावदेव प्रमेयं एतावदेव हि आगमेन तत्त्वान्निवद्ध्यते वस्तुतस्तु प्रमेयमिति पर्यायास्तथा
चकारादिन्याभासपृथिवीलोहितादिभासन्निरूपेणेनसम्मेलनाभासोऽसजः सन्निवेशस्त्वनियतिरूपो नियतिर्हि निय
माः सर्वाभासप्राणाभावस्फुरणमेव च पृथिव्याभासस्य विचित्रतया च कासस्पृग्भोद्वराकारतानभेदाभासस्थमाया
नस्वस्वप्रकाशाभावव्याप्तिवत्त्वात्ति त्यासनाता वदयेभविष्यत्येतत्त् सर्वयावताविदप्रमेयं भगवत एव भेदने
चाभेदेन च स्थानत्वं चवताताभासभेदाभेदहष्टिरेव च परमार्थाहृदयहृदिप्रवेशउपायः समवलम्बनीयोऽनन्तव्यवहारो
पायपरमेश्वरस्वरूपानुप्रवेशाविरोधीति प्रतिपादितम् एतदेवस्फुटयत्सकलप्रमेयसिद्धिः परमेश्वरपदायत्तेति
निरूपयति ॥ गुणैः शब्दादिभिर्भेदो जात्यादिभिरभिन्नता भावानामित्थमेकत्र प्रमातर्युपपद्यते ॥ इहाद्वयेन
त्वार्थेनच चकासद्भक्तरेणैव प्रधानमन्यमप्युत्तामुभयत्रापि वाधकाभावात् सम्यग्नोहियदि वाधकं एकतरत्रस्या
नदुभयेस एव भागः पुनरुन्मज्जनसहिष्णुतारहितो विद्धिलायं विलीयेतनचैवम् अत एव भेदाभेदयोर्विरोधेऽङ्गः स
मर्थमभिमन्यमानैरेकैरवियावेदानिर्वाच्यत्वमस्यैरथाभासलग्नतया सा हन्तत्वमभिदधाद्भिरात्मा परश्ववेचितः स
वेदनविश्रान्तेन तद्द्वयमपि भाति संवेदनस्य स्वात्मैक्यात् सर्वस्य हि निरस्याप्येतत्स्वसंवेदनसिद्धमुक्तं विवेचितविश्रान्तमे
कतामापद्यमानं जलज्वलनमप्यविरुद्धतत्त्वमेवोक्तम् अत एव यथाभीष्टमस्मत्संविदिति अत एव गुणैरूपादिरूपैः विशे
षाभासितया विवक्षितैः शब्दादिभिर्वाऽदेशादिभिर्वा यो भेदो जातिवस्तुहृष्यादिदेशग्रहणादायस्थाभेदो भावाना ५३

मित्थमित्युक्तनीत्या क्रियासंवेधेत्यत्तः प्रभृतिनिरूपितः स एकत्र प्रमातरि सकलप्रमाप्रमाणसंयोजनवियोजनादिवि
चित्रासंव्यवहृतप्रपंचोचितस्वात्मभगवति अस्मदीयरूपस्यैकात्तशायिनि शिवशब्दव्यपदेश्ये समुपपद्यते नान्यथा वि
प्रोक्षणान्येव च भेदकानि तानि किमेतत्परस्परस्याविशेषैः अयमस्य परमार्थः यत देशादिविशिष्टघटादारंभणकाले पश्चात्तनसंघट
तद्भ्रएकारंभकालेस्वर्वामिलितः अयं सद्भावाय : एतावदृग्सद्देनेस्वर्योमिलितामिमामित्यपरि वानितीयत्तेव योमिस
वेत्तादीनामसिद्धः यस्मा एवात्मा विभुभेदावभासश्च स्वलभवान्तरेण सिद्धतावद्भेदाभेदरूपं प्रमेयरूपं तत्त्वमेकप्रमातृविम
श्रान्तानिशाकतान्नयतीति नन्वेवंभूतोऽपयं प्रमाता तत्त्वैव तर्हि प्रमाणेऽपि न्यासे प्रयतनीयम् न प्रमेये यदाह प्रमा
नैश्चयत्तः फलवानिति तदेतदाशंकाप्रथमोपादिममेव प्रमेयं स्मारयत्याचार्यः तथाहि अजडात्मा निषेधं वा सिद्धिं
वाविदधीनकश्चित्य ह स्तत्तदेवेदानीं ज्ञातप्रमाणस्वरूपे परमेश्वरस्वरूपे च निर्वाहणार्थमेवभूतं हि प्रमाणं तदेवंभूतेभ
गवतिकथं क्रमतामितितदेतत्स्फुटयितुमाह ॥ विश्ववैचित्र्यचित्रस्य समभित्तितलोपमे विरुद्धाभावसंस्पर्शे प
रमार्थसतीश्वरे प्रमातरि पुराणेन्तु सर्वदाभातविग्रहे किं प्रमाणं नवाभासः सर्वप्रमितिभागिनि ॥ परिमितप्रमात्
लग्नेनवनवप्राभासः प्रमेयोमुखः प्रमाणमिसर्वतन्त्रप्रकाशवपुषि प्रकाशमात्रस्वभावे पूर्वसिद्धकः प्रमाणस्यापये
गः संभावनावा तथा च पूर्वप्रसिद्धप्रमातरि सति स्वप्रकाशानर्भूतविमर्शमयीमश्रुत पूर्वी प्रमेयस्यासिद्धिं वितरति
प्रमाणं प्रमातुस्वादिसिद्धस्य किलाग्रासिद्धिरस्तु विश्ववैचित्र्यं हि परमेश्वरे प्रकाशकात्मनि सति भाति यथा चित्रभित्तौ य
दिहि नीलपीतादिकं प्रथगेव पराम्रष्टं न सा स्वात्मविश्रान्तेषु तेषु तस्यैवान्यान्यविषये जडाएव धिरकस्यानि ज्ञानानि
स्वविषयमात्रनिष्ठितानि विकल्पाश्च तदनुसारेण भवन्तस्तथैवाति चित्रमिदमिति कथं कारं प्रतिपत्तिः एकत्र निष्ठानेना

ई॰ विरहितेभिन्निते लेरवा विभक्तनिर्भासत्वमादिविभागत्वमभिमन्यमानाभिरुत्पन्नतत्सकलीयमितिविश्वाभासोयुक्तस्तदेवप्र
टी॰ काशाभिन्नत्वमत्तेनवेविश्वात्मकभेदोपपत्तिरितिभावभेदग्रहणप्रकाशाभिन्नेरनुपातिनीप्रकाशतामाह तत्रस्वप्रका
५४ शेकिंप्रमाणेन अपेक्ष्यते पूर्वमसप्रकाशेनभवति तर्हिसएवनास्तीतिसाधनं प्रकाशमात्ररूपत्वात्तस्य नचास्य
नास्तीत्वभावेनस्पर्शउपपद्यतेतास्यसावेवपरमार्थतः स्वप्रकाशस्यैवसत्त्वात्तत्तस्यासद्रूपत्वायोगात् अपेक्ष्यते
ईश्वरतातस्याप्रमितत्वप्रमासत्ते तदपितयतोस्यसोप्रमातृत्वेनचेनचकस्मात्कस्यायमुद्यमः चकास्तिचेत्तर्हिप्रमा
तृत्वेनैवेश्वरता तदाहईश्वरेप्रमातरिसर्वदाभातविग्रहेइति विशेषणग्रहणेनेतिविग्रहोमायापारणं स्वरूपम् अत्रपवस्त
तत्रप्रकाशरूपत्वाद्भावस्यपूर्णायोगस्येप्रभावात्प्रवेशानुनयः कालस्यवहारःसोपिनास्तीतिपूर्वाणेउक्तम् तत्र
किंप्रमाणेनकृतःप्रयोजनात्कस्तत्रप्रमाणस्योपयोगइति तत्रचकिंप्रमाणेनकिंचिदुपपत्त्यावटतेइत्यर्थः यतः
प्रमाणंनामाभिनवावभासरूपप्रमातरिप्रमितिलक्षणंविश्रांतिविदधत्प्रमाणंभवति प्रमाताचाविच्छिन्नावभा
सः सर्वाश्चप्रमितीःस्वात्मन्येतन्मुखरूपेभजतेतत्राभिनवतयामभिनवप्राभासः तत्प्रमितिरूपविश्रामयत तस्मादेह
प्राणपुर्यष्टकशून्यप्रायएवप्रमातरिप्रमाणमुच्यते तत्रापिचेदेवंप्रेयदिनामनन्तकथंचित्संविदंशेतत्रापिदि
प्र॰ शुयोत्स्वेत्तत्स्यैवसंकुचितत्वादभिनवाभाससंकोचविहीनसत्यमातृत्वलग्नतापेक्षयाकथ्यतेस्वसंवेदनंप्रमाणं
सौगतेनापिममेदन्तानुमितिकल्पितप्रमातृत्वलग्नमेवतदपेतम् ननुपरमार्थप्रमातरिप्रमाणेनकिंचित्तदुक्तं
मया यत्प्रमेयीकृतोस्मीतिसर्वोप्यात्मनिलक्ष्यते कथंप्रमेयीकरणेसद्भूततास्महेश्वरः ५९ ननुवेयदिभगव
तिप्रमाणमनुपयोगिअत्रउपपत्तिचकिमर्थंतद्विषयंशास्त्रम् तद्धिप्रमाणमेव परार्थानुमानात्मकंहिशास्त्रं तत्र ५७

चप्रमाणाद्विवेकप्राप्यपदार्थतत्त्वमयत्वमेवपरमार्थः यत्तुसौगतैःपंचावयवत्वादिदूषणेनतत्त्वावग्रहमात्रम् सोऽत्रासद्धि
पदार्थेषुनिरूप्यमाणेषुसम्यक्प्रतिपाद्यपरःप्रतिपद्यते हिताहितप्राप्तिपरिहारयोरित्यादिनाचग्रंथेनपरस्यकिंप्र
योजनेनतद्धिपरस्यप्रतिपत्तिसाचपरार्थानुमानात्तच्चप्रतिज्ञादेरुपयोगइतितत्परिनिर्णयपरप्रतिपत्तिकारियस्मा
र्थतःसकलमेवशास्त्रंपरार्थानुमानमागमव्यतिरिक्तंन्यायनिर्माणेचैषमात्रप्रत्यादेननिरूपितमिति अत्रापिप्र
त्यक्षमेवकिंतुमोहवशादितिस्मारयितुमाह ॥ अप्रवर्तितपूर्वोत्रकेवलंमूढतावशात् शक्तिप्रकाशेनेशा ६
दिव्यवहारःप्रवर्त्यते ॥ इहपरमेश्वरस्यैवमेवपरस्वातंत्र्ययदस्मादृशायस्यदृशा विशेषासंभाव्यमानातिदुष्करवा
स्तुसंपादनंनाम इत्तस्थकिम तिदुष्करंभविष्यति यत्प्रकाशात्मनिश्चलंविदितत्वाद्रूपएवप्रकाशमानेप्रकाशन
निषेधावभासः प्रकाशमानः तस्मात्परमेश्वरस्येदंतत्परंस्वातंत्र्यंयत्पृथावभासनंपशुरूपतावभासनंनामग्राहकं
शासमुत्थापनं तद्धोरेणच्छ्वासोच्छ्वासनमपि सैषाभगवतोमायाशक्तिरुच्यते यथोक्तंमायाविमोहनीनामे
ति तदेवंभूतात्मायाशक्तिरूपात्स्वातंत्र्याद्यामूढतावितप्रपूर्णोपिचेतनता स्वात्मवर्तिन इच्छासंदोदयस्फुटस्फा
रितविश्वभावनिर्भरितात्मनः पूर्णत्वस्यस्मृत्यादिशक्तात्मनःस्वातंत्र्यस्यदेशकालसंकोचवैकल्पादयत्तसिद्ध
वैभवनित्यताधर्मस्यचप्रकाशमानस्यापि यदप्रकाशमानतयाभिमननंतत्स्वावशात्सामर्थ्यात्सर्वयोनप्रवर्तितं
तः समनंतरश्लोकद्वयोक्तस्वरूपेप्रमातरिभगवतिईश्वरतादिनाउक्तेनैवपूर्णतादिनाव्यवहारोयः खल्वहमिति
भातिसपूर्णःस्वतंत्रोविभुर्नित्यः इत्येवमादिरूपस्तत्प्रवर्तयत्नुव्यवहारंलोकइत्येनेनशक्तीनामिच्छातानक्रियाणां

ई. प्रकाशकेनप्रत्यभिज्ञारूपेणाव्यवहारसाधनपर्यायात्ममानात्मनाभासेनव्यवहारंप्रवर्त्तयतोनन्तसमर्थाचरणं
टी. क्रियते प्रवर्त्त्यतेऽनिदंताणोकेवलमिति नतु किंचिदपूर्वं क्रियते नापितज्ज्ञेनोप्रकाशमाने प्रकाशते प्रकाशमान
५५ एवयतःप्रकाशतेइत्यभिमानं ननु तदपसार्यते तदपसारणमेव हि परमेश्वरतालाभो मुक्तिस्तदनपसारणं च संसा
रः अभिमननमात्रसारं चैतद्वयम् उभयमपि चेदं भगवद्विजृम्भितमेव एतदुक्तं भवति यथा भोक्तृस्वभासमानेनैव
वात्मनि अशुद्धप्रहारितोऽहमिति मोहान्मन्यमानस्य मोहोऽपसार्यते कः खल्वन्यस्त्वदृशोऽवस्तु ईश्वरमीदृशमिति चेतन्
एषु तदस्ति भवत इति पुनः पुनरभिदधता न तु चास्यापूर्वं किंचन रचितं तथा पशुलोकस्य भासमानेनैवात्मनि
ह्मीश्वरत्वादिमोहादभिसंदधतो मोहोऽपसार्यते यो हि तेन क्रियास्वातंत्र्ययुक्तः स ईश्वरो यथा सिद्धांतपुरा
णादिषु प्रसिद्धस्तथा च त्वमिति यदि वा यस्मिन्पदार्थे सत्तेश्वरो राजेव स्वमंडले तथा च त्वयि विश्वमिति ई
श्वरतानां व्यवहारो हि नान्यनिमित्तक इति व्याप्तिः यत्खलु यत्राग्रे भाति तत्तेन प्रणीतिधानमिव मणिभिस्तत्त्वं च वि
श्वमिति यस्य यदंतर्वर्ति भाति स तावतो व्यापकः सप्तहस्तकरवमणिवृत्तयि च सेविद्रूपे धरादि सदाशिवांतं प्रासादप्रति
योक्तं विश्वमिति यस्मिन्स्थिते यद्देहे तिलीयते च तत्तस्य पूर्वापरभागव्यापि यथा भूमावंकुरः तथा च त्वयि प्रकाशरू
पे विश्वमिति एवमन्येऽपि धर्मा स्वहस्वशोष्णादि सिद्ध्योज्याः तदेवं व्यपोदितेऽस्यामोहस्थितेऽपि तत्संस्कारस्मा
त्रविष्टतेशरीरादौ अनात्मन्यात्माभिमानस्वरः सत्येवात्मन्यनात्माभिमानोत्सवादौ च प्रकाशमानेनैवानात्मनात्माभिमानो
त्तानेन्द्रजालं तत्त्वस्य पश्यतोपीन्द्रजालं यथा न तत्त्वतो व्यामोहस्तथा प्रत्यभिज्ञातात्मस्वरूपस्य ततो निवृत्तेः प्रथा ५५

प्रापितपर्यंतेदेहे परमेश्वरतैव अभ्यासभावनाबलेन तत्पशिवत्वाशासनोपदिष्टेन देहचट्टादावेव परमेश्वरतासमावे
शमभिनिविशपपपत इहेव शरीरे परमेश्वरताप्रायमीदृशः ननु वस्तुतः पूर्णेनादेहत्वेसेव संकोचनप्राणस्य गल
नेयथास्थितविश्वात्मकतापन्नः यस्य तत्त्वव्यवहारसाधने हेतुकलापेप्यसिद्धताभिमानस्तत्रापि व्यवहारसाधनेदेव
व्यामोहोपसार्यः यस्य तु सर्वथा नापसरति तत्रेश्वरपाकिवलात्मूढतैव तस्यापि कर्णपथगमनात् संस्कारया
केनावश्यं एकदाचिद्भविष्यति एवं सद्रूपलाभ इति तदेवं कर्तृरीत्यादिश्लोकद्वयेन यदुक्तं तदेव विश्ववैचित्र्येत्यादिश्लो
कत्रयेणोपस्कृत्य पुनर्निरूपितम् एवंभूतं तावत्प्रमाणं तदेवंभूते भगवति कथमुपपद्यताम् तेनेश्वरफलमकेश
स्वादाविति भंगपर्यंतरेणेदानीं तदेव निर्वाहितमिति शिवम् ७ इति श्रीमदाचार्याभिनवगुप्तविरचितायामी
श्वरप्रत्यभिज्ञासूत्रविमर्शिन्यां क्रियाधिकारे मानतत्फलमेयनिरूपणं तृतीयमाह्निकम् ३ भावानाभासय
न्कर्ता निर्मले स्वात्मदर्पणे कार्यकारणभावं च यश्चित्रं तं स्तुमः शिवम् ॥ क्रियाशक्तिस्फारप्रायसंबंधाभिधानप्र
संगात् ज्ञाप्यज्ञापकभावस्य तत्त्वप्रसाध्य कार्यकारणभावस्य तत्त्वं प्रसादयितुं श्लोकैकविंशत्याह्निकांतरमारभ्यते
एषचेत्यादि एवमिच्छैव हेतुता कर्तृता क्रियेत्युक्तम् तत्र श्लोकेन समस्तकर्तृकर्मभाव एव कार्यकारणभाव इत्य
प्रतिपाद्यते ततः श्लोकत्रयेण जडस्य कारणत्वं परा क्रियते तत्र श्लोकषट्के न चेतनस्येव कर्तेति रूपाकारणतात्सा
ध्यते ततः प्रसंगादनुमाने नियतशक्तिरूपेणापजीव्येति श्लोकत्रयेणोच्यते सौगतोक्तः कार्यकारणभावपरमा
र्थोऽपि अस्मत्पक्षमेवालंबते नो चेन्न किंचिदिति त्रिभिः श्लोकैः सांख्याद्यदर्शितोऽपि कार्यकार्यकारणभावो नोप

ई.
टी.
५९

पद्यते इति यच्चस्मदुक्तं चेतनस्य कर्तृत्वं नोरीक्रियते इति त्रिभिः चेतनस्यापि अनीश्वरत्वायां नैतद्घटते इति द्वाभ्यामि-
तिसंक्षेपार्थः शेषार्थस्तु व्याख्यायते एवं क्रियाशक्तिमत्त्वेन प्रमात्रैकरूपतां भगवति व्यवस्थाप्य कर्तृत्वरूप-
तापि तत एव यत्नसिद्धेति दर्शयितुमाह ॥ एष चानन्तशक्तित्वादेवमाभासयत्यमून् भावानिच्छावशादेषा
क्रिया निर्मातृतास्य सा ॥ चोवधारणे एष एव प्रकृतः प्रमाता अमून् भावानाभासितपूर्वानाभासमानानाभास-
यति प्रविविक्तत्वेन प्रवर्तयेन कथमिच्छाया ईशितुरभिन्नायाः प्रविकल्परूपायाः क्रमाया वशेन सामर्थ्येन ऊर्ध्वास्य
ते भावाः स्थिताः आह अनन्तशक्तित्वादिति विश्वे हि भावास्तस्यैव शक्तिरूपत्वेन स्वरूपात्मत्वेन स्थिता इत्युक्तम्
स्वामिनश्चात्मसंस्थस्येत्यत्र यदेतदाभासनेयासाविच्छाक्रियास्य भगवतो निर्मातृत्वम् ननु बीजादङ्कुरउद्भव-
त्युपपद्यते नचात्रकश्चिच्चेतनोनुप्रविश्य स्थस्तत्कथमेतदुक्तमित्याशङ्क्याह ॥ जडस्य तु न सा शक्तिः सत्ता यद-
सतः सतः कर्तृकर्मत्वतत्त्वैव कार्यकारणतातनः ॥ जडस्य बीजस्यैवंभूतं सामर्थ्यं नास्ति यदसद्रूपं सद्रूपं
वाङ्कुरं परिदृश्यमानसत्ताकं करोति बीजादङ्कुरो जायते इति हि नाङ्कुरस्य महिमा असत्त्वात् अङ्कुरो जायते इति
च महिमा कथं बीजस्य ततोङ्कुरादन्यत्वात् यत एवं तस्मात् कार्यक्रियाशक्त्याभास्यमानकर्मत्वे तिष्ठत्येतेनवा-
विष्कृते कार्यतेनैन कर्तीत्य समर्थाचरणेनेति कारणमपि कर्तृत्वे चेतने विश्राम्यति असतः सतश्चापि सद्रूपस्यास-
तश्चापर्याः वार्थो वात्र गर्भीकृतः असतो रस्य सतो वा बीजस्यैव रस्येव सतो सतो वा इत्येवं वा ननु जडस्य कथ-
मेषा शक्तिर्न भवतीत्याह ॥ यदसत्तदसद्युक्ता नासतः सत्त्वरूपता सतोपि न पुनः सत्तालाभेनार्थोऽथ चोच्यते॥ सद्धाका ५९

र्यमसत्त्वा संभाव्यते उभयात्मकमनुभयात्मकमनिर्वाच्यमिति तत्स्वर्गाचेव विकल्प्यते तत्किमनेन यच्चसद्घटः तत्-
ह्वितस्य सद्रूपत्वेव परमार्थ इति कथं स्वरूपविरुद्धं सत्त्वमभ्युपगम्येत नहि पादपतनशतैरपि नीलमात्मनिर्पीतिमा-
नंमृष्यते अथ सन्नेव घटस्तर्हि किमन्यदस्य याच्यते दण्डचक्रसत्त्वात् अभिव्यक्तिविषयत्वस्फुटत्वादयोपि सदसद्रू-
पतयाचिन्त्याः तत्त्वेवं तत्रसीमास्पतामं नैतदपि युक्तमित्याह अथ चोच्यते कार्यकारणतालोके तद्वश्यमस- कार्यकारणतान्लोके
मर्थायमर्थ इति यावत् तत्रचेत्स्यमुपपद्यते इति दर्शयति ॥ सान्तर्विपरिवर्तिनः उभयेन्द्रियवेद्यत्वं तस्य कस्या-
पि शक्तितः ॥ कुम्भकारहृदयेन्तर्मनोगोचरत्वात्पूर्वमपि स्वसंविदेकात्मतया विचित्रत्वेन विश्वस्याभेदाभेदा-
त्मना परिवर्तमानस्य स्पन्दनेन स्फुरतो यदन्तर्वहिष्करणद्वयवेद्यत्वमाभास्यते एषैव सा कार्यकारणता उभय-
ग्रहणमुपलक्षणं यस्य यावति पूर्णार्थक्रियासमाप्तिरिति यावत् सुखादीनामन्तःकरणैकवेद्यतापादन-
मेव निर्माणम् नच कुम्भकारे प्राणपुर्यष्टकवहिश्शून्यदेहप्रायेतदेतात्स्थितं तस्यापि जडत्वात् ततः संविदे-
वस्वात्मनि विश्वमाभासयति शक्तिवैचित्र्यान्नस्य कस्यापीति पूर्वमुक्तस्याचिन्त्यपर्यनुयोज्यमहिम्न इत्यर्थः नत्व-
वास्यमुभयेन्द्रियवेद्यत्वमपि सदसद्धेति यतोयमत्र परमार्थः यथा दर्पणान्तः कुम्भकारनिर्वर्त्यमानघटादि प्रति-
विम्बे दर्पणस्यैव तथाभासनमहिमा तथा स्वप्रदर्शने संविदस्तथापि तन्महिम्नैव पतनेनेदं वहिः स्फुटरूपं क्रिय-
ते इत्यभिमान उल्लसति एवं संविन्महिम्नाभिमानो जायते मयेदं कृतमनेनेदं कृतं मम हृदये स्फुरितमस्य हृ-
दये स्फुरितं इति जनत्रत उस्य शद्वादे हरोपेतोभिमान इति संवित्स्वभावैकर्तृत्वं व्यवस्थाप्यते न तु भावरूपमेव

कुंभकृति दंड चक्रादौ घटे व स्थितेत न्मदिम्ना

ई॰ स्वाभासत्वात्किंद्वयेंद्रियवेद्यत्वेन उक्तमेवस्फुटमर्थक्रियात्मस्वरूपंअनेनेनोक्तमितिकोविरोधः अनेनचविचारेणा
टी॰ प्रकृतमपिक्रियास्वरूपंसिद्धंभवतीतिदर्शयति ॥ एवमेकाक्रियासैषासक्रमांतर्बहिःस्थितिः एकसैवोभयात्मा
५० रसहितैषोरूपपादिता ॥ सैषेतिद्वयस्थाःस्वरूपतःआश्रयतश्चनोपपद्यतेइतिउपालंभःकृतःसाउपपत्त्यास्थापिता यतः
[illegible] संविद्रूपादांतरान्प्रभृतिइंद्रियगोचरतयास्थितिराभासरूपाततएववेद्यात्मककर्मीलिंगतेनसक्रमानावडुपपन्ना क
[illegible] तंकर्मैकाश्रयतादात्म्याश्रयएकासचयकआश्रयःसंविद्रूपत्वेनस्वकर्तृत्वस्वतंत्रत्वाभ्यामुभयोप्येतर्वहीरूपंसहतेइति
नत्वभवत्वद्घटादावेवंयत्रतत्वीजांकुरादौचेतनानावनप्रवेशोनदृश्यते तत्रकथंवीजस्यैवांकुरःकार्योनभवतीत्याशं
क्याह ॥ वहिस्तस्यैवतत्कार्यंयदंतर्यदपेक्षया प्रमात्रपेक्षयाचोक्ताद्वयीवाह्यांतरास्थितिः मातैवकारणंतेन
नसचाभासद्वयस्थितौ॥ कार्यस्यास्थितएवैकस्तदेकस्यक्रियोचितः स्थितिराभासतैववेद्यात्मकेत्युपपादयं ॥
अंतराभाससमानस्यतथारूपपरित्यागेनैवबहिराभासनंनिर्माणंतन्नत्स्यअयदवलंबनमपेक्ष्यातिरिक्तंतदुक्तंतस्यैवां
तरवस्तुरूपविपरिच्छिन्नमात्रस्यबहिष्करणंहिभवति संविद्रूपंचप्रमातारमपेक्ष्यअंतराभासिनोभावस्यापेक्ष्यैव
वाह्याभासइतितेनैवतेषांबहिष्करणावभासनेयुक्ते ततश्चप्रमातैवकारणंभवति नजडःस्वार्थेचः यस्मात्प्र
प्रमाताकार्यस्यांतर्बहिराभासनद्वयनिमित्ततयास्थितस्तेनविनातदपेक्ष्याभासद्वयस्यानुपपत्तेः तस्मादेक
स्यप्रमातुरेवनतुकस्यचिज्जडस्यघटादिनाप्रसाधितस्यक्रियानिर्मातृताभवतीति ० अतएवांकुरेपीशोनिमित्तंप
रमेश्वरः तदन्यस्यापिवीजादेर्हेतुतानोपपद्यते ॥ अतएवचेतनएवनिर्माताअतएवनैयायिकादिभिरंकुरादे ५०

य॰

र्बुद्धिमानेवपरमेश्वरोहेतुत्वेनेष्टः तत्रैतैर्निमित्तकारणतासांगीकृताक्रियाविभागादिक्रमायातपरमाणवादिद्वार
कतयासमवायिकारणंनिजावयवारंभपरंपरयानुततईश्वरादन्यस्यापिवीजभूमिजलादेर्हेतुताकथितासत्यंक
थितासातुनोपपद्यते उक्तयुक्त्याजडस्यहेतुत्वायोगात् ततश्चेश्वरएववीजभूमिजलाभाससाहित्येनांकुरात्मना
भासतइतीयानत्रपरमार्थः ० ननुपरिदृष्टवीजादिव्यतिरिक्तबुद्धिमत्कारणव्यतिरेकेणविनाकिमुपरुध्यते इति
परस्यशंकांनिर्भिंदन्नाह ॥ तथाहिकुंभकारोसावैश्वर्यैवव्यवस्थया तत्तन्मृदादिसंस्कारक्रमेणजनयेद्घटम् ॥
तथाहीतिनिदर्शनोपक्रमेण स्वामिरेवंभूतेवहष्टेतिदृढयतिजडहेतुत्वेचेतनप्रेरितः कार्यकर्तृत्वंमृदादयःयदिहि
सन्निधिमात्रेण विदध्युःकुंभकारेणकिमत्रकृतं शिविकस्थपकादिपरंपरयानेजनयंति साचकुंभकारायत्तेति
वि॰ चेन्नः सिद्धंसाध्यम् निविकसंपादनेपितेचेतनप्रेरणमपेक्षंते इतितज्जडकारणतांचेतनप्रेरणमंतरेणनकुचि
त्कार्यकारित्वम् यदिहिस्यान्मृदादीनामपिस्यादित्येकांतपक्षः ततश्चयदचेतनं कार्यकारितच्चेतनापेक्षंमृदाद
यइवतथाचवीजादीतिस्वभावः अचेतनकार्यकारित्वादिकदाचित्कत्वात्सनिमित्तेनचान्यदस्यनिमित्तमुपपद्यते अ
नुपलंभादितिचेतनप्रेरणंयदितन्निमित्तीकुर्याद्व्यापकविरुद्धमपिनिमित्तकत्वप्रसज्येत नचयुक्तं तन्मृदादावपि
तस्यैवप्रसंगादितिसिद्धाव्याप्तिः अतश्चकुंभकृदेवतत्रेश्वरः तदेवाह ईश्वररूपायाव्यवस्थातयायः समस्तदंडचा
क्रसूत्रादीनांसंस्कारोमृदोमर्दनंदंडस्यग्रहणंतेनचक्रस्यपरिवर्तनमित्यादिस्तदारंभोयःक्रमःशिविकस्थपकादिरू
पस्तेनघटंनियोगतोजनयति नान्यथेतिनियोगेलिङ्भावः किंचयदितकुप्यते वस्तुतःकुंभकारोपिपश्चैवा

ई॰ स्वतन्त्रविमर्शात्मना रूपेण या व्यवस्थया मृदादिसंस्कारापेक्षतया प्रदर्शितनियतपूर्वभावेन निजशक्तिविजृम्भितो घा
प्री॰ टं जनयेत् अन्यथा अचेतना मृदादयः कथं कुंभकारेच्छामनुरुध्येरन् तेन वा पि वा पटसंपादनेच्छा किं नाद्रिये
५८ रन् तदेतदप्युक्तमनेनैव सूत्रेण तथा हीति ननु एवं कुंभकृतो नास्ति कर्तृत्वं इति समुन्नीतो हेतुमीश्वरधर्ममेव
स्या यद्यपि प्रत्येकं पि पुत्रागमयोः सदेवमेव तथापि समस्तेतरनिर्माणमध्य एवेदमपि परमेश्वरेणैव निर्मितं घ
टादि च लक्ष्यस्य कुंभकारपशोर्मिथ्याकर्तृत्वाभिमानः प्रतिभवत्येवाधमर्णताभिमानः जडहेतवो बीजभूम्य
म्बुतनुप्रेरितमवित्तमिहेति कार्यारंभकत्वात् यो यो जडः कार्यारंभकः स स चेतनप्रेरितः यथा मृदादिः तथा
मृं चैते मृदादयः कार्यारंभकत्वाभिमानाः यद्यपि नरेश्वरस्येवेश्वरस्यापि दृशी सा स्याभिमानोपमुक्तमिति तदा दंग
ना सौ कर्ता कश्चित् तस्मिदमप्युक्तं सूत्रेणैव तथा हीति कुंभकारस्य मृदादिसंस्कारक्रमेण किंचिद्घटं जनयाम
हमेतेन जनयामीति य एक एव स्थितेस्मिन्नायसंप्रज्ञानमाविचारः सर्वेश्वरे संवेधिन एव विविधात्मत्वरूपात् व्याप्तेन न
त्वप्रकाशनरूपादवस्थानादिति संप्रत्येश्लिष्ट तस्मादीश्वर एव सर्वत्र कर्ता प्रदेहे च स एव तेन परिमितेक
र्ता अपि तु सर्वत्र कर्ता इत्येतावति संप्ररूढे येनावधानमिति स्थितं इष्यते चास्य चेतनस्य स्वातन्त्र्यमेव सर्व
त्र जृंभमाणं जडानपि यत्त्वात्मतामापादयति न तु जडानां वस्तुतो विक्लृप्तो सामर्थ्यमिति यदुक्तं तत्सर्वत्रादि
प्रसिद्धत्वदर्शनेन दृढयति ॥ योगिनामपि मृद्बीजैर्विनैवेच्छावशेन तत् घटादि जायते तत्तत्स्थिरस्वार्थक्रिया
करम् ॥ यदिह चेतनप्रेरितं कारणमिति प्रसिद्धं मृदादि यस्तु तदनपेक्ष्ये बीजादियदादेर्कृता देश्यजनकं तदेव ५८

यदि परमार्थतः कारणं स्यात् तद्व्यतिरेकेण घटांकुरादेः कथं योगीच्छामात्रेण जन्म स्यात् अकारणत्वप्रसं
गात् एतेषां वा कारणत्वापत्तेः अथोच्यते अन्य एव ते घटांकुरादयो मृद्बीजादिजन्याः अन्य एव च योगीच्छादिजन्या
इति तत्रापि प्रबोधयति विमर्शाभेदाभावे भेदाय तिष्ठति सर्वमेवोक्तम् तथापि योगी त्वेत्प्रतिष्ठतेच्छालस्य चेच्छाना
सम्भ^ हत्येव घटो भवतु यो मृदादिकृतकुंभवद्भूयस्त्यर्थक्रियाकरणचतुरश्चास्तीति तदेतदाह तस्य तस्य स्थिरस्वार्थ
क्रियान्तरानुवेधिनः कालान्तरानुवेधिनश्च स्वस्यात्मीयस्यार्थक्रियाविशेषस्य करणे हेतुतत्कीलानुकूलत्व
पं घटादि जायते इति येनाहुः नोपादानं विना घटाद्युत्पत्तिः योगी त्विच्छया परमाणून् प्रपञ्चं च घटयती
ति तेनेवाच्याः यदि खल्वन्वयव्यतिरेकागमादिपरिदृष्टः कार्यकारणभावो योगिषु तद्विपर्यये तीतिसदृश्याः
मावर्जयति वः तत्किं परमाणुग्रहणेन नो चेद्घटस्य कपालादिशरीरस्य स्वावयवास्तेषां निजं निजं प्रसिद्धं
तृणशल्मलशाल्यादि अन्यथाभवनमसहमानैर्लौकिकमेव कारणमिति घटे मृदेव चक्रादि देहे स्त्रीपुरुषसंयो
गादि सर्वमपेक्ष्यपरिदृष्टचिरतरकालपरिवासमिति योगीच्छासमनन्तरोदितं घटदेहादि संभवाद्धः सम
यं एव चेतन एव तु तथा तथा भवति भगवान् भूरिभर्गो महादेवो नियत्यनुवर्तनोल्लंघनचतुरस्वातन्त्र्य इत्य
त्र एव तेन नियत्यनुवर्तिनि लौकिके प्रसिद्धे कार्यकारणभावे स्वातन्त्र्येण तदुल्लंघनमाद्रियमाणस्य तु योगिप्रायप्र
सिद्धे लोकोत्तरे इति न कश्चिद्विरोधः इयोयं लोक एव परमार्थतस्तत्स एव कर्माकमत्रूपविश्वस्य ब्रह्मादिकृमिपर्यं
चस्य भावः प्रकाशते चेतनो हि स्वात्मदर्पणे भावान् प्रतिबिंबवदाभासयतीति सिद्धान्तः यदाह सर्वथरः ति
कप्रपंचं^

ई. रूपादानसंभारमभिन्नावेवतन्वते जगच्चित्रंनमस्तस्मैकलाश्लाघ्याय शूलिनेइति ९ ननुयदिपुष्टकारणे
टी. क्षुंचनेनापितत्कारणजन्यकार्यविशेषतुल्यवृत्तान्येवकार्याणिजायन्ते भग्नास्तर्ह्यनुमानकथाः तथाहि क
५९ थमन्यदन्यत्रनियमवत्त्वेदित्याशङ्क्याप्रामाणिकत्वेरमन्येत्स्मादात्मनतद्भ्यन्तरीनियमविद्यानमपगते नहि
निःस्वभावंवस्तुभवति नापिभिन्नस्वभावं स्वभावभेदेतद्भेदात्पर्यायप्रशस्तत्स्वभावद्वयाभावेचनिःस्व
भिन्नहेतुके^ भावताप्रसंगात् एवंनिर्हेतुकेत्वकार्येवाच्यम् उभयत्रापिहेतुकृतैवव्यवस्थास्वहेतुतएवहिशिंशपावृक्ष
स्वभावाव्यभिचारिणीजाता स्वहेतुतश्चकृतभुग्धूमजननस्वभावस्तदिदानीनियतश्चक्तिनिकार्यकारणभा
वेसर्वमिदंविघटेत योगीच्छयापिशिंशपाप्यवृक्षस्वभावाभवेत् धूमेतुदिग्गणंचोद्यम् अग्न्यादिसामग्रीयो
गीच्छोद्भूताधूमंनजनयेत् योगीच्छावानग्निर्विधूममितिनसाध्यत्वमानम् अस्तिचतज्ज्ञाने कैश्चित्पाशंकाः ॥
योगिनिर्माणताभावेप्रमाणान्तरनिश्चिते कार्यहेतुःस्वभावोवानएवोत्पभिश्चलेः ॥ योगीच्छापिसर्वा
थातादृशमेवनतुवृश्चिकगोमयादिसंभूतवृश्चिकादिन्यायेनकथंविद्धसवीर्यादिनाभिन्नंकार्यंजनयतीति
यत्कथितमतएवास्माद्धेतोःकार्यंवाधूमाद्यन्यायनुमानेशिंशपात्वादिस्वभावोवावृक्षत्वाद्यनुमानेएवंहेतुर्भव
ति यदिप्रमाणान्तरेणलोकप्रसिद्ध्यायोगिनिर्माणत्वस्याभावोनिश्चितोभवतिनान्यथा अतएवानुमानेजन्मा
नताभ्यासलोकप्रसिद्ध्यादिकम वश्यापरोध्यम् मानचकृतानुमानप्रवृत्तयोर्वीजमितिवशत्तेभराविषयमुवाच ५९

पतञ्जलिः अन्येचयौक्तिकायोगिप्रत्यक्षकल्पप्रत्यक्षसद्भावेसमस्तवस्तुग्रहणायकल्पितत्वेनः सांव्यवहारि
केनप्रमाणेनास्माकंभरःप्रकृतेस्माकमीश्वरद्रष्टंतत्त्वस्वप्रकाशमेवान्यप्रमेयापरोक्षेपितोपकृष्यतेइत्यलम
सकृत् ननुस्वभावहेतौकिमनुयावितयाह वृक्षत्वाव्यभिचारिणःशिंशपाया उत्पन्नेर्थस्मूलंकारणेनतन्य
वहिसतन्मात्रानुवंधीस्वभावोजायतेइति ततश्चापकस्वामवध्यभीनस्वरूपादेरसतोगतिः हेतुधर्मानुमानेनधू
मेंधनविकारवत् इतिस्वभावहेतुन्यायः ननुवृश्चिकादीनांकीटगोमयाद्यनेककारणत्वेनावद्वहरसवीर्यादि
भेदस्तत्रेत्यन्यदेतत् ^उ योगिजन्यत्वमवह्निकस्यापिधूमस्यसत्येनाम स्वभावस्यतुकथंविपर्याससंभावना
नहिनीलंसदेवानीलंयोगीच्छयाभवतीतिकश्चित्प्रामाणिकःप्रतीयात् उच्यतेद्विविधःस्वभावहेतुरंत
लीनकार्यकारणभावस्तद्विपरीतश्च वह्निमानयंपर्वतोधूमवत्त्वादिति अनित्योयंकृतकत्वादिति तत्राद्यस्य
तावत्कार्यकारणभावएवमूलंइतिकिंतत्रोच्यते अपरस्तुविचार्यते यदितावत्कृतकत्वस्यकारणानन्तत्वंनाम य^
स्वभावःकथमभवनपरिच्छिन्नभवनस्वभावतानामानित्यत्वंस्वभावःस्यात् आभासभेदात् अभेदेत्वाभाससंदे
त्वसिद्धावेव साध्यस्यसिद्धत्वाद्यदिपरंव्यवहारःसाध्यते ^उ रूपंवृक्षत्वादितिन्यायेनव्यवहारस्तत्राभिधानात्म
कार्यएव तन्नेत्वनियतिशक्तिरंगीकृताभवतापितस्मात्सर्वेषुस्वभावहेतुष्वाभासभेदंविनाव्यवहारमात्रसाध ष्टं
नमेव हेत्वाभासमयत्वादेवानुपिकोहितत्रसाध्याभासःव्याहतैर्नामेषैववार्त्ता सामान्यानामियमेवसरणिः

हे. तस्मान्नियतिशक्त्यायत्तः शिंशपाभासवृक्षाभासयोः पूर्ववत्सामानाधिकरण्यपाभासो हेतवल्लान्नतः स्वभा
टी. वो ये हेतहेतसद्भावमूलएवतत्तस्मान्नान्येनेदमुक्तं इत्यपि सर्वः स्वभावहेतरुत्पत्तिमूलत्वादिति शिंशपाभासएववववस्तिति
६० समर्थितं प्राक् ततश्च शिंशपायामेकस्यामेवसत्त्यमानायां शाखादिमत्त्वेनातद्रूपाणामसत्त्वेः वृक्षाभासस्य सामा
न्यात्मनः साध्यस्य तामापिनास्तीति संभाव्यतेएव यत्तुतदेकरूपं विशिष्टं वृक्षत्वं तत्तत्त्वं शिंशपात्वमेव न
त्त्वसिद्धमितिनसाध्यम् कारणयत्तमिदमित्याभासेपिनस्यादित्यत्राभासः एवमर्थक्रियाकारित्वाभासोपि
क्षणिकत्वाभास इतिनियत्यपेक्षयैवसर्वैस्वभावहेतवो नान्यथेतिप्रकृतानपक्षः ॥ नत्वाभासत्वस्त्वादेस्त्वाभा
सयोरेवकार्यकारणभावः स्वनाभातस्याग्रेवस्तुत्वमित्यनाभातेनकथं धूमोजन्यते ततश्च धूमादग्नेः कारण
स्यकथमनुमानमित्याशंक्यसमर्थयितुमाह ॥ धूमस्तज्जन्यमात्रेकवह्न्याभासादितोभवेत् यदोक्तादप्यवि
पतेर्धूमाभासादिनूतनं ॥ कार्यमव्यभिचार्यस्य लिंगम् ॥ एकवारेतावन्महानसेप्रत्यक्षानुपलंभवलेनधूमाग्न्या
भासधूमाभासयोः कार्यकारणभावोगृहीतः स्वविवितानवाहिनोदर्शनेप्रतिसंतानमन्यच्चान्यच्चाभासइति
स्वाभासयोरेवकार्यकारणतागृहीता ततसंतानांतरगतयोः तदीयदहनांतस्यासंवेदनात् ततश्चेदानीमनुमा
तेनभवेत्स्वसंतानगताद्धूमाभासात्कथमिसर्वत्तादिप्रमातृसंतानांतरनिष्ठस्याग्न्याभासस्येतिनिश्चयः इहतद
र्शनेव्याप्तिग्रहणावस्थायांयावंतस्तद्देशसंभाव्यमानसद्भावाः प्रमातारस्तावतामेकोसौधूमाभासश्चवह्ना ६०

भासश्चवाग्नये इवतावतितेषांपरमेश्वरेणेकत्वनिर्मितमितिप्रक्रमम् ततः स्वपरसंतानविशेषत्यागेनधूमाभास
मात्रंवह्न्याभासमात्रस्यकार्यमितिव्याप्तिगृहीतायांभूयोपिपर्वतेयोधूमाभासः सोपिवह्न्याभासादेवेतिव्याप्ति
स्मरणाद्गुनमिमीते अत्रपर्वतेग्न्याभासइति तावतिधूमाभासविशेषेप्रमात्रंतरेः सहैकीभूयवह्न्याभाससामा
न्यांशेपरोक्तरूपांशसहितेविशेषाभासांतरविविक्तेप्रमात्रंतरैः स्वाकमेकीभवतीतियावत् भूयइतिव्याप्तिगृ
हीत्वाभूयोपियोधूमाभासः शब्दिग्रहणादंकुराभासादिर्गृह्यते सोप्याभासोनूतनोपूर्वोनतत्रधूमतत्तधूमवद्गम
गः सचापियनेरसंवेद्यमानाहहव्याभासाद्बीजाभासादेरेववाभवेत् ततएवजनितुंशक्नोति नान्यतः शा
किलिङ्गः सत्याभासस्तेषुतेषुप्रमातृष्वेकएव अनेकत्वेतन्नयुज्यते एवेनदित्याशयः यतश्चसएकोधिपतिश्च
वह्न्याभासोधूमाकारणं ततोधूमाभासोसवाग्न्याभासस्याव्यभिचारित्वात्लिंगंयोगिकृतत्वाभावेनि र्ये
श्चितेसर्वतितत्स्मात्कार्यात्सोनुमीयते यतः परोक्षोसावधिपतित्वादेव २ नन्वेवंगोपालघटिकांतरविशेषित
निगतादपिधूमाभासाद्वह्न्याभासानुमानमित्याशंकाह ॥ अन्यप्रमातृगात् तदाभासस्तदाभासादेवतत्त्व
धिपतेःपरः ॥ परोनूतनादन्योयोधूमाभासः सधूमाभासादेवप्रमात्रंतरवर्तिनोधिपतिरूपात्परोक्षादिति
तथाभूताद्धूमाभासात्कथमकारणस्याभूतोवह्न्याभासोनुमीयतामित्यभिप्रायशेषः कुशलाश्चलक्षयेत्ये
वविवेकं अप्यार्थस्यानुमानिकवकृत्तरव्यवहारोपयोगिनोयत्नेनव्युत्पाद्यः कार्येत्याशयेननूतनमिति

ई. यदेवस्सुविवेचितं तदेवव्यक्तेयदर्शनद्वारेण स्फुटीकृतं ॥ ननु चैवं प्रमाभासो व्याभासादित्येवीकृते चेन्नहि चेतनत
ही. स्येवकर्तृत्वमितियदुक्तं तत्कथं तथाहि बीजे सत्यंकुरो भवतीति यदेतद्यदृष्टं प्रमाणिवदेव तत्कथमनादरात्स
५१ दमित्याशंक्याह ॥ अस्मिन्सतीदमस्तीति कार्यकारणतापिया साप्यपेक्षाविहीनानां जडानां नोपपद्यते ॥
एकएवभावः तावन्न कार्यकारणभावो भावद्वयमपि न च युगपद्भावि कार्यकारणरूपे च पटवत् । क्रमभाव्यपि ना
नियतक्रमं स्यात् नीलपीतादिज्ञानवत् नियतक्रमकत्वेपि न पूर्वभावि कार्यमुत्तरकालभावि च कारणमित्येवंनि
यतपूर्वभावं कारणं नियतपरभावं कार्यमिति यद्यपि तावन्मतम् तत्स्वरूपादनधिकाचेत् पूर्वतापरताच
तद्भावद्वयमात्रं सच सचेतनार्थोपि वा न कश्चिन्नपेक्षापेक्षारूपत्वात् । म सत्यपि हि स्यात्तत्र यथा पूर्वतानामप्रयो
जकसत्ताकत्वम् एतत्ताचप्रयोज्यसत्ताकत्वं तर्हि बीजसत्ताङ्कुरप्रयोजिकासत्ताङ्कुरविज्ञानाङ्कुरोतभावमात्मन्य
तथ्यतीति श्रुङ्कुराभावे प्रयोजकत्वमात्रं स्यान्न दृष्टिनर्क्किंचित् अन्यापेक्षितात्मस्य एवं प्रयोज्यसत्ताकेपि वक्तव्यम् । ए
वेन केवलं भावमात्रमेव कार्यकारणताश्वादयः पत्तानोपपन्नाः यावदस्मिन्सतीति भूतविभक्त्यासमन्यप्रयोजकत्व
त्ताकमित्येवं रूपापिया कार्यकारणतासापि नोपपद्यते प्रमाणेन न संभवति जडानाम् अन्योन्यापेक्षात्मपत्तीवितं
साच जडानां न संभवति कथमिति चेत् उच्यते ॥ नहि स्वात्मैकनिष्ठानाम नुसंधानवर्जिनाम् सदसत्तापदेप्यथ
समम्यर्थः प्रकल्पते ॥ जडाः किलान्योन्यरूपमनुसंधानमप्रभविष्णवः अन्योन्यानुसंधाने रूपत्वं जडविरुद्धे ५१

नैचेतनत्वेन व्याप्तम् अनुसंधानेचापेक्षा चेतनस्वरूपमेव अन्यत्रतस्योपचरितानोनु संध्यानविहीनत्वाज्जडोभावः
स्वात्ममात्रविश्रान्तिसंतोषसंकुचितशरीरः कथं परत्र प्रसरेत् ततश्च यदि बीजे सदंकुरो सत्तथापि विपदयः उभय
मपि वा स्य यदि वा सद्यथाप्येकं सोपाख्यमन्यन्निरुपाख्यं द्वयमपि वा सोपाख्यं निरुपाख्यं वा तथापि प्रातिस्विका
र्थमात्रं धर्मान्तरेणासंस्पृष्टमन्याकीर्णानाप्यनालिंगितमवतिष्ठते तस्य समस्तस्यार्थस्यापेक्षारूपत्वेनचेतनविश्रान्तत्वा
त् ५५ यस्मादचेतनेषु नापेक्षोपपद्यते ॥ अतएव विभक्तार्थः प्रमात्रेकसमाश्रयः क्रियाकारकभावाख्यो युक्तो
भावसमन्वयः ॥ समसमीत्रयायाविभक्तेरन्यस्याश्रपि वा योर्थः क्रियाकारकभावलक्षणः स एव तावद्भावा
नां समन्वयोनान्यः शुष्कः कश्चित् स च यदि स्वतंत्रे विद्रूपे भावद्वये विश्राम्यति तदोपपद्यते अन्यथा तन्नक
थंचित् तथाहि विकल्पेनाप्यसौ व्यवक्रियमाणेन वस्तुनिष्ठतयोपपद्यते वस्त्वनुसरणप्राणो हि विकल्पा
नुभवानुसारित्वेयेव भवति साचेह नास्ति वस्तुप्रभवत्वेनवस्त्वनुसारी ह्यनुभवः वस्तु च स्वात्मनिष्ठमिसृतम्
तस्माद्बीजे सत्यंकुरो वेक्षासतिप्रमज्ञा च स्वतंत्रविद्रूपप्रमातृविश्रान्तत्वे सर्वमेतद्युज्यते नान्यथेति ५६ न च प्रयो
ज्यप्रयोजकसत्ताकत्वलक्षणापेक्षा यदि स्वात्मैकनिष्ठत्वेनोपपाद्यते तर्हि कार्यकारणयोस्तादात्म्यवादिनां सां
ख्यानां मते सा संभवेत्येव तत्किं चेतन्यवित्स्वभावकर्तृत्ववादसमर्थनेनेत्याशंक्याह ॥ परस्परस्वभावत्वे का
र्यकारणयोरपि एकत्वमेव भेदे हि नैवान्योन्यस्वरूपता ॥ यदि बीजेंकुरः स्वभावसंख्ये [illegible] कुर एव हि न बीजे
संपृ

इं॰ स्यात् किं चित्वादिपर्यायो वा स्यादिति किं वा कारणं किं वा कार्यं अथास्य बीजमन्योऽङ्कुरस्तद्धेतुपरम्परात्मकत्वे भे
टी॰ दाभेदौ ह्येकस्यैकदेशविषयौ विरुद्धावेव । ८ नन्वेकमेव बीजमङ्कुरादिविचित्ररूपमवभाते दीर्घदीर्घतरामर्शि शालि
८२ भिः स्रोतोवदविच्छिन्नस्वरूपमेव निर्बाधं प्रत्यक्षमुपलभ्यते तथा चाङ्कुरावस्थं बीजमिति दृष्टेव व्यवहारो भवतीति नाङ्कुरविरहित
मङ्कुरात्मता वर्त्तते अङ्कुरीभूतमप्यमङ्कुरत्वादित्येवं प्रधानं महदादिपरिणतीभूतेयावदभिव्यक्तभूतमतत्तत्सर्गप्रलयपर
म्परात्मतां प्राप्तमिति विततग्राहिणो प्रतीतिर्भागाभिनिवेशवशादनुकार्यकारणतापरिकल्पनं तस्यैव भावस्यावि
श्रसतप्रायमित्याशङ्क्याह ॥ एकात्मनो विभेदस्य क्रिया कालक्रमानुगा तथा स्यात् कर्तृतैवं तु तस्यापरिणमेत्त
या ॥ इह दीर्घदर्शिना प्रत्यक्षानुमानागम्यात्पतमप्रमाणमूलं प्रत्यभिज्ञाश्रित्या तदेवोदेशखड्गः एवमो हस
स्यमनेन प्रकारेणैषस्वावलम्बनेन विस्फीभूतमिति समर्थ्यते तत्र प्रत्यभिज्ञानबलेन यदेकात्मकमेव स्वभावं तस्य यो
भेदोऽन्यान्यरूपता इयमेव सा क्रियोच्यते यतः काललक्षणेन क्रमेणानुगता ते सम्यान्यस्वभावा ह्युपगच्छन्ति पूर्वापरी
भूतरूपैव क्रियोच्यते यत एवं क्रियात्वेतिनेन प्रकारेण प्रधानादेः क्रियावेशलक्षणेन कर्तृत्वमेव स्यात् ननु स्वकं
कारणतामात्रम् यतो हेतोस्तथैतिनेनतेन महदादिप्रकारेण सततमेव क्रमिकान्तथाभासनरूपो यः परिणामलक्ष
णो क्रियासमाविशतः परिणमतः किञ्चिद्रूपं परित्यज्य त्यक्तावस्थमनुवर्तयितव्यं च व्यवस्थाप्यनिर्वर्त्यमानत्व
नीयरूपप्रकृताप्रधानादेस्तया हेतुभूतया ८ नन्वप्रधानं परिणामक्रियायां कर्तृरूपमित्येतत्समर्थितमिति को दोः ८२

षः न हि प्रकृष्टवदस्याकर्तृत्वमाशङ्क्यते इत्याशङ्क्याह ॥ न चैकस्यैवं तद्युक्तं भेदाभेदविरोधतः आभासभेदादेकत्ववि
दात्मनि न युज्यते ॥ एवमिति प्रत्यभिज्ञारूपस्य धर्मिणः सततप्रवृत्तक्रमरूपधर्मभेदसंभेदस्वात्मलक्षणपरिणमन
क्रियाकर्तृकत्वे यदुक्तं तत्प्रधानादेरयुक्तं जडत्वात् जडो हि नाम परिनिष्ठितस्वभावः प्रमेयपदपतितः स च रूपभे
दाद्भिन्नो व्यवस्थापनीयः नीलपीतादिवत् एकस्वभावत्वाच्चाभिन्नो [illegible] नीलादिवत् न तस्यैव
स्वभावो भिन्नश्चाभिन्नश्च भवितुमर्हति विधिनिषेधयोरेकत्रैकदाविरोधात् कश्चित्स्वभावो भिन्नः कश्चि
च्चाभिन्न इति चेत् द्वौ तर्हीमौ स्वभावावेकस्य स्वभावस्य भवेताम् न चैवं युक्तम् भेदाभेदव्यवस्थैवम् स्खलिता स
र्वव्यवस्थितिः स्यात् एवं जडस्येदमिति परिनिष्ठिताभासतया सर्वतः परिच्छिन्नरूपत्वेन प्रमेयपदपतित
स्य नानाविधस्वभावभेदैकत्वे संभवः प्रतिपद्यते यत्तु प्रमेयदशापतितं न भवति किं तु चिद्रूपतया प्रकाशपरमार्थ
रूपं चिदेकस्वभावं तत्र भेदाभेदरूपता उपलभ्यते अनुभवादेव हि स्वच्छस्यादर्शादेरखण्डितस्वस्वभाव
स्यैव पर्वतमतङ्गजादिरूपसहस्रसंभिन्नं वपुरुपलभ्यते न च रजतादिवत् यथा शुक्तिकायामकं चेदं रूपति
रोधानेन वर्तन्ते तथा दर्पणे पर्वतादिन्न दर्पणस्य हि तथावभासे दर्पणत्वेव स्वरूपमुन्मीलति निर्मलोऽयमङ्क
श्चायं मुक्तायं दर्पण इत्यभिमानात् न हि पर्वतो वा हस्ती वा संक्रामति स्वदेशत्यागप्रसंगादस्य न चास्य पृष्ठे ऽसौ
भाति दर्पणानवभासप्रसंगात् न च मध्ये निविडकठिनमप्रतिघस्वभावस्य तत्रानुप्रवेशसंभावनाभावात्

ई. नपश्चात्तत्रादर्शनात् दूरतयापृथगवभासनात् नचतन्नियतनोत्फलितप्रत्यासत्त्याश्रयात्तद्धामप्युल्लेखः पर्वतमे
टी. वयुक्तमिति बिम्बप्रतिबिम्बयोरुभयोरपि पर्वतपार्श्वगतदर्पणावभासेवलोकनात् तस्मान्निर्मलतामाहा
८३ त्म्येन यदनेनावभाससंभेदश्चैकतानता च गिरिशिखरोपरिवर्तिनश्चैकत्रैव वेधेन गरुत्पदार्थस्य सहस्वा
वभासइति चिद्रूपस्यैव कर्तृत्वमुपपन्नं न भिन्नस्य भेदावेशसहिष्णुत्वेन क्रियाशक्त्यावेशासंभवात् ॥९॥
नन्वेतावता विज्ञानमेव ब्रह्मरूपमिमां विश्वरूपतां वैचित्र्यीं परिगृह्णातु किमीश्वरतापरिकल्पनयेत्या
शंक्याह ॥ बाह्यत्वेपि चिदेकत्वेन स्यादाभासभिन्नयोः चिकीर्षालक्षणैकत्वपरामर्शं विना क्रिया ॥
चिद्रूपस्यैकत्वं यदि बाह्यत्वं भेदः पुनरस्य मविद्योपप्लवादिति उच्यते तदा कस्यासावविद्योपप्लव इति न
ब्रह्मणस्तावत् ब्रह्मणो हि विवेकरूपस्य कथमविद्यारूपता नचान्यत्किंचिदस्ति वस्तु तेजीवादियस्याविद्या
भवेत् अनिर्वाच्येयमविद्येति चेत्कस्यानिर्वाच्येति न विद्मः स्वरूपेण च भाति नचनिर्वाच्येति किमेतत् युक्त्या
नोपपद्यत इति चेत् संवेदनतिरस्कारिणी कावलयुक्तिर्नाम अनुपपन्नोभासमानस्य कल्पा भविष्यति स
रूपमेव ब्रह्माभिन्नं च कास्ति अविकल्पकं विकल्पबलात्तु भेदोयमिति चेत् कस्यायं विकल्पनव्यापारो नाम
ब्रह्मणश्चेदविद्यायोगः नचान्योस्ति अविकल्पकं च सत्यं विकल्पकं चासत्यमिति इति कुतो विभागः भासमा
नत्वस्याविशेषात् भासमानोपि भेदो बाध्यत इति चेत् अभेदोप्येवं भेदभासनेन तस्य बाधात् विपरीतसंवे ८३

दनोदय एव बाधो नान्यः कश्चित् बाधोपि च भासमानत्वादेव सत्योन्य न इति भेदोपि भासमानः कथमविद्या
भासनमवधीर्यागमैकप्रमाणकोयमभेद इति चेदागमोपि भेदात्मक एवावस्तुभूतः प्रमातृप्रमाणप्रमेय
विभागश्चेति नकिंचिदेतत् तस्माद्बाह्यत्वेपि चिदेकत्वमभ्युपगम्यापि तस्य कर्तृत्वलक्षणाभिन्नरूपसमावेशात्मि
का क्रिया नोपपद्यते परामर्शलक्षणं तु स्वातन्त्र्यं यदि भवति तदोपपद्यते सर्वम् परामर्शो हि चिकीर्षारूपो
ज्ञानस्य चास्य सर्वमन्तर्भूतं निर्मातव्यमभेदकल्पेनास्ते इत्युक्तं स्वामिनश्चात्मसंस्थस्येत्यत्र तेन स्वात्मरूपमेव वि
श्वस्य स्वरूपं प्रकाशात्मतापरमार्थं प्रत्युदितप्रकाशाभेदमेव सत्प्रकाशपरमार्थेनैव भेदेन प्रकाशयति महे
श्वर इति तदेवास्यातिदुर्घटकारित्वलक्षणं स्वातन्त्र्यमैश्वर्यमुच्यते आभासभिन्नयोरिति क्रियापेक्षा संबं
धसामान्ये षष्ठी पृथ्व्याद्ययोश्चितिं विभज्यते आभासेन भिन्नो जडो जडाभासो जडो घटादिः कर्मरूपः चिदाभा
सः कर्तृरूप इति तयोः क्रियैकस्य क्रियमाणत्वमपरस्य कर्तृत्वं न भवेत् चिकीर्षारूपेण निर्मातव्यभाववर्गाभेदपरा
मर्शात्मना विना एका चासौ क्रिया कथं भिन्नयोः स्वभावभूता भवेत् कार्यकारणता इत्यत्र वा कर्तृकर्मणी उक्ते
कारकान्तराण्यपि तु कर्तृत्वानुप्रवेशीनि परमार्थतोन्यथा करणादेर्भिन्नकारकता तो कथमभिन्नासा यदि
वा आभासेन योर्भिन्नो जडश्चेतनो तयोर्या चिकीर्षा एकस्य क्रियमाणता परस्य चित्ता तत्स्वभावमेकत्वपरामर्शं
विनेति यत्राभासभिन्नयोरहमिदमिति यः परामर्श एकविश्रान्तिरूपः चिकीर्षात्मा तेन विना तत्राभासभिन्नयोः

ई॰ एकपरामर्शं विना चिकीर्षालक्षणा कथं क्रियेतिवा एवंक्रियोवाचिकीर्षा वा परामर्शो वा पेक्षणीतित्वसापेक्ष
टी॰ त्वान्नु समासः २॰ एतदुपसंहरति ॥ इत्थं तथा घटपटाद्याभासजगदात्मना तिष्ठासोरेवमिच्छैव हेतुता कर्तृता
८४ क्रिया ॥ यतो न जडस्य कारणता न कर्तृता तथानीश्वरस्य चेतनस्यापि इत्यनेन हेतुप्रकारेणेदं ज्ञातं यत् य एव तत्
षा चिकीर्षुस्तस्यैव सा चिकीर्षा वहिर्विषयं प्रतीत्य प्रसरा क्रियेत्यभिधीयते सैव कर्तृता तदेव हेतुत्वम् नान्यत्किंचित्
तेन घटादिस्तिष्ठतीत्ययमर्थः घटात्मना तिष्ठासुः स्वात्मन्यात्मानमभ्युपगच्छन्तत्तद्रूपमसहमानो ये महेश्वरः
प्रकाशस्तिष्ठतीति घटपटाद्याभासरूपं यत्किल जगत्तदात्मना यस्तस्थेतितेन तेन तज्जगत्तज्जन्मस्थित्या
दिभावविकारस्तद्धेदक्रियासहस्ररूपेणाप्यः स्यात्तमिच्छुस्तत्तेन तस्यापाएवमिति विविचित्ररूपाऽस्यासैव क्रि
याइति संबंधः तेन महेश्वर एव भगवान्विश्वकर्ता इति शिवम् ॥ इति श्रीमदाचार्याभिनवगुप्तविरचितायां
मीश्वरप्रत्यभिज्ञासूत्रविमर्शिन्यां क्रियाधिकारे कार्यकारणतत्त्वनिर्णये चतुर्थमाह्निकम् ॥ ४ ॥ समाप्तश्चा
यं क्रियाधिकारो द्वितीयो विमर्शः २ येनाप्यसर्वागमसिंधुसंघः पूर्णत्वमभ्येति कृतार्थतां च तं नौम्यहं श्रीभव
तत्त्वचिंतारत्नौघसारं परमागमाब्धिम् श्रीमत्सदाशिवोदारप्रारंभं वसुधांतकम् यदंतर्भाति तत्त्वानां चक्रं तं मे
स्तमः शिवम् ॥ एवमधिकारद्वयेन ज्ञानक्रियास्वरूपं वितत्य निर्णीतम् अथैतदेव तत्त्वाक्रियानामविश्वयदा
र्थावभासनालक्षणैत्यकं समनंतरमेव केवलं विश्वपदार्थाइति तत आभासरूपा एव जडचेतनलक्षणाः पदार्था ८४

स्ते च क्रियतारूपेण संशय्यंते नहि प्रत्यक्षं मायाप्रमातुस्सर्वज्ञक्रमते अनुमानमप्येवं नहि यच दृष्टं तत्र तन्न लिंगाव्या
प्त्यादिग्रहणसंभवः आगमस्तु परिच्छिन्नप्रकाशात्मकमाहेश्वरविमर्शपरमार्थः किं किं न प्रपेदिति तदनुसारेण
पदार्थनिर्णये विश्वप्रमेयीकरणप्रतिलब्धतद्विश्वोत्तीर्णप्रमातृतापदलब्धये गमीकरणाभिप्रायेण निरूपयितुमा
चार्य आगमाधिकारं तृतीयमारभते तत्र श्लोकैकादशकेन एवमेतं वहिर्हितिरित्यादिना स्थूलसूक्ष्मतत्त्वभेदतत्त्वं
तेनागमसिद्धं शिवादिधरण्यंतमेकैकाभासरूपतात्मकं दर्शनांतरे सामान्यमिति यद्यवहृतं तस्य सामानाधि
करण्ययोगादनेन स्वलक्षणावभासत्वात् हवि [illegible] शेषसर्वैकस्समस्तोयं शरीरभुवनादिविभवसंपारमे
श्वरागमसिद्धं युक्त्याप्यवगतं प्रत्येकतत्त्वग्रामं दर्शयतीत्याह्निकतात्पर्यम् तत्राधिकारसंगतिं योजयन्पूर्व
न॰ पक्षप्रतिक्षेपं चोपसंहरन् शिवतत्त्वस्वरूपमेव दर्शयितुमाह ॥ एवमंतर्वहिर्वृत्तिः क्रियाकालक्रमानुगा मा
तुरेव तदन्योन्यावियुक्ते ज्ञानकर्मणी ॥ एवमिति यतः परदर्शनोक्तः कार्यकारणभावो ज्ञानरूपप्रतिष्ठानकथं
चिदुपपन्नः किंतु चिद्रूप एवांतर्वहिरात्मना प्रकाशपरमार्थेनापि वपुषा तत्त्याभासनरूपेण वर्तमानः कालक्र
न॰ ममादिपदक्रियाभिधीयते तस्य प्रमातुरेव ज्ञानशक्तिवपुषो धर्मस्त्विति तस्मादन्योन्यमवियुक्तं ज्ञानं क्रिया च ज्ञा
नं विमर्शानुप्राणितं विमर्श एव च क्रियेति न च ज्ञानशक्तिविहीनस्य क्रियायोग इति तदेतदवियुक्तज्ञानक्रियात्र
यं क्रियाद्वारेण सकलतत्त्वराशिगतसृष्टिसंहारशतसहस्रप्रतिबिंबनमहिस्नयत्तदुपदेशभावनादिषु तथाभास

ई॰ मानमनाभासनद्रूपमपि वस्तुतः शिवतत्त्वमित्युक्तं भवति । ननु एवंभूते शिवतत्त्वे चेदहंतातो नतिरिच्यमानमिदं वि
टी॰ श्वमिति किमन्यत्तत्त्वं स्यात् एकत्रिंशद्विंशांतो वा तत्त्वानां कथं क्रमो भवेत् देशकालाभेदात् एवमेवैतत् ॥ किं
त्वांतरदशोद्रेकात्सादाख्यं तत्त्वमादितः बहिर्भावपरत्वे तु परतः पारमेश्वरम् ॥ यद्यप्येकमेव शिवतत्त्वं तथा
नू॰ पि तदीयमेव स्वातंत्र्यं स्वात्मनि स्व...इदंतावत्यानिर्विकल्पतया दर्शयति । स्वरूपवैचित्र्यमेव देशकालक्रमः श्रुति
क्रियावैचित्र्यमयोऽसौ तत्तत्त्वांतरीक्षानद्रूपायाः दशानस्यां इदंकावभासेन सादाख्यसदाख्या याभवेत्यतः प्रभृति
सदिति प्रख्या सदाख्या याख्यस्य सदाशिवशब्दरूपायाः इदं वाच्यं तत्त्वम् स्फुटक्रमोपदेशादौ प्रथममनुचिंतनतत्सा
दाख्यतत्त्वम् बहिर्भावस्य क्रियाशक्तिमयस्य परत्वे तु इदंकाभासे सति पारमेश्वरं परमेश्वरशब्दवाच्यमीश्वर
तत्त्वं नाम तच्च सादाख्यस्य पश्चादुचितावभासनम् एतदुक्तं भवति अहंतस्वभावस्तत्त्वम् इति भिन्नानां व
र्गाणां वर्गीकरणनिमित्तं यदेकमविभक्तं भाति तदुच्यते यथा गिरिसरित्पुरप्रभृतीनां नदीसरस्सागरादीनां
च पृथिवीरूपत्वमब्रूपत्वं चेति ततः शुद्धे चेतनवर्गो यो मंत्रमहेश्वराख्यस्तस्य प्रथमसृष्टावस्माकमेव नः करो
कदेशमिव बर्हिर्मलप्रायमुन्मीलितमात्रचित्रकल्पं यद्भावचक्रं सदा मे च अस्मान्ममत्वेन तथाभूतमेव चकास्ति
प्रतिबिंबप्रायतया तस्य चेतनवर्गस्य तादृशभावराशौ तथा प्रथनं नाम यत्किंचिद्विशेषत्वेन तत्सदाशिवतत्त्वे
मंत्रेश्वरादिरूपस्य तु चेतनराशेः स्फुटीभूतेदंसहिताहंकरणसरणिसंप्राप्तभाववर्गप्रतिमे विश्वप्रतिबिंबत ८५

याभाति तस्य तथा प्रथनमीश्वरतत्त्वं यत्तु सदाशिवभट्टारकेश्वरभट्टारकयोः ध्येयोपास्यादिरूपतया सत्त्वं तत् विश्व २
रूढत्वम् पृथग्योरेवमेतयोः तत्तन्नाम सारूप्यादिति तथा यथाहुरेके तत्त्वविस्फुरदाद्यपि तत्त्वमध्ये किं न गणितानीति
नामधेयांतरमप्यत्र तत्त्वद्वये दर्शयति ॥ ईश्वरो बहिरुन्मेषो निमेषोऽन्तः सदाशिवः ॥ यस्योन्मेषादुदयो जगतस्तस्य
ईश्वरतत्त्वमेवोन्मेषशब्देनोक्तं विश्वस्य हि स्फुटत्वं वा सत्त्वमुन्मेषणं निमेषणं तु स्फुटत्वापादनमेतद्रूपतो द्वे च न र
भि ति निमेषः सदाशिवतत्त्वं यतो जगतः प्रलय इति शुद्धोऽयं स्पंदः परमेश्वरस्याचलस्यापि प्रशस्तरूपांतरापत्तिल
क्षणः किंचिच्चलनात्मतया स्फुरद्रूपत्वात् परमेश्वरस्य हि परमार्थेन तत्ता शाक्त एव तत्त्वग्रामः कावित्तु शक्ति
रूपवहिस्तरशक्तिक्रोडीकारं ऊर्ध्वनीनिकटत्वादुपास्या घटस्येव घटात्मिका काविदन्यापत्तिस्वरूपमात्रा
त्रविश्वाहृत्यावटस्येव सत्त्वात्मिका एवं निमेषोन्मेषशक्ती एव सदाशिवेश्वरौ तयोस्तथापि स्यात् देवतेस्म...पित
पातामि २ अथ तदपि स्यात् देवता द्वयरातेकारणं वियातत्त्वमाह ॥ सामानाधिकरण्यं च सद्विद्याहमिदंधियोः
प्रकाशस्य यदात्ममात्रविश्रमणोऽप्रतनोन्मुखः स्वात्मप्रकाशता विश्रांतिलक्षणो विमर्शः सोऽहमित्युच्यते य
स्तु नोन्मुखः स इदमिति स च स्वप्रकाशनमात्रेऽपि न तथा न तन्मुखत्वे रूपे विश्राम्यति परमार्थेन । तत्र यो विमर्शो शि
वतत्त्वे द्वितीये वियेश्वरतामध्यमे तद्रूपे अहमिदमिति समभूततत्तलासु दृष्ट्या येन यो विमर्शः सदाशिवतायां ई
श्वरभट्टारके च इदं भावसत्तया अमला मलता क्रमो विशेषः येन ते अहमिति इदमिति धियोः तयोर्मायाश

ई॰ मातरिस्थगाधिकरणत्वमहमितिग्राहकेइदमितिचग्राह्ये तन्निरासेनैकस्मिन्नेवाधिकरणेयत्संगमनं संबं
टी॰ ध[illegible] स्वरूपप्रथनं तत्सती शुद्धाविद्या शुद्धविद्यातोमायाप्रमातृगतात्या अन्यैव तत्र यदाहमित्यस्य तदधि
६८ करणं चिन्मात्ररूपं तत्रैवेदमंशमुन्मज्जयति तदासास्फुटत्वात्सदाशिवता अहमिदमिति इदमहमिति तु
इदमित्यंशे स्फुटीभूते धिकरणेस्यदाहमंशविमर्शो निषिंचतितदेश्वरतेति विभागः तत्कस्मादियं शुद्धावि
द्येत्यनयाह ॥ इदंभावोपपन्नानां वेद्यभूमिमुपेयुषाम् भावानां बोधसारत्वाद्यथावस्त्ववलोकनात् ॥
अवलोकनं प्रथनं वेदनं विद्या यथावस्तुत्वं वस्त्वनुसारित्वं च तत्साम्राद्विरविपरीतता वेद्यदशां चोपगतत्व
तोऽङ्गीकृतत्वतो ऽतएवेदमिति एवंभूतेनोदितेन परामर्शेनोपपन्नानां परामृश्यमानानां बोधएवप्रकाशा भावानां॰
त्मा सारं रूपं वस्तु प्रकाशश्चानन्योन्मुखविमर्शात्माहमिति न च तेषां यदेव पारमार्थिकं रूपं तत्रैवप्रथनात् ह॰
हमिदमित्यस्य शुद्धवेदनरूपत्वम् अपि विद्यान्तरूपादेवत्ताइदयामनस्वरूपं विभक्तमित्येवं भेगण प्रतिपादयन्त्य
ग्रसमव्यवहारेण ॥ अत्रापरत्वं भावानामनात्मत्वेन भासनात् परताहंतयाच्छादात्परापरदशा हि सा ॥
परत्वं पूर्णत्वमनन्यापेक्षताहमिति अपरत्वमपूर्णताअन्यापेक्षता इदमिति अत्र च तत्त्वद्वये भावानां धामला
धं॰ ध्यामलरूपाणामुभयांशस्पर्शित्वात्परापरत्वमिति वेद्यभावनिष्ठादशा तत्त्वस्वरूपा तदवभासयितृ
मंत्रेश्वरादिशुद्धप्रमातृसंवेद्यवस्तुसारा या तत्तन्निष्ठा संवेदनदशा सा शुद्धविद्या तत्प्रमातृवर्गाधिष्ठातृत्वे ६८

श्रीसदाशिवेश्वरभट्टारकरूपतेति संक्षेपः एवमेकेषां मतेऽहमिदमित्याच्छादको योभागस्तन्मध्यप्रधानाशुद्धवि
या अन्ये त्वमन्यंते येऽसौ विदंभागश्चा[illegible]च्छादनीयस्तस्य यदवभासनं तन्मध्यानाशुद्धविद्या अन्यथा हि सइदमं
शः केनभासतां मायायास्तत्राभावात् भावे वा प्ररोहप्रसंगात् अतएवेयं प्ररोहासहिष्णुयत इदंतोभा
य॰ स्ति ततः शुद्धाभासनाशुद्धविद्येति तत एवात्र रूढमायाकल्पनात्मकहामायेयं श्रीगौरवादिगुरुभिरु
पदिष्टा तदेतदाह ॥ भेदधीरेव भावेषु कर्तुर्बोधात्मनोपि या मायाशक्त्येव सा विद्येत्यन्ये विद्येश्वरा
यथा ॥ मायाप्रमातरि शून्यादिरूपेप्यहमिति चिन्मात्रएव प्रमातरि कर्तरि च सति विदेकरूपेष्वपि भा
वेषु यदचिद्रूपतया भेदप्रकाशनलक्षणं स्यात् तत्सा शुद्धविद्या मायाशक्त्यात्मस्यावेद्यभागे भेदप्रकाश
नात् नचमायेव ग्राहकस्य चिन्मात्रताभागेतावद्विपर्यासनात् येन प्रकारेण विद्येश्वरा भगवंतोनंते
तादयावर्तंते ते हि शुद्धचिन्मात्ररूपा हीनाहंभावाः स्वतस्त्वभिन्नं वेद्यं पश्यंति यथाह तत्रवादिनामीश्वरः प

ई॰
टी॰
८०

पृ^

वेग्राहकेपि तस्यैव तत्तद्रूपान्तरस्मार्थरूपेग्राह्यविपर्यासनशक्तिः ज्ञ
ह्वविद्याविशेषस्वरूपाणां येनेश्वरः भगवतः परमशिवस्य प्रच्छन्नभेदा
वभासनेसदाशिवेश्वरता तत्रास्फुटत्वेच्छाशक्तिरीश्वरस्यव्याप्रि
यतेस्फुटनेज्ञानशक्तिः प्रच्छन्नभेदेग्राह्यविपर्यासेपिग्राहक
चिन्मात्रतायोविशेषस्वेषुक्रियाशक्तिः ग्राहकग्राह्यविपर्यास
ह्वयप्रच्छन्नैवमायाशक्तिः साचपशुप्रमातृषुग्राहकयाथोभ
यविपर्याससंस्कारेणनिवृत्तेपियदेतद्वस्तुपरमार्थप्रथनेनतद्वि
याशक्तिव्यापारोयोगिज्ञानिप्रभृतिषुपशुप्रमातृषुनदेतद्दर्शयति

८०

तस्यैश्वर्यस्वभावस्यपशुभावेप्रकाशिका विद्याशक्तिः ॥ पशुभावेविपर्यासैकरसत्वलक्षणेपाशनीयत्वेप्रसक्तेतत्त्वेहेश्व
रेश्वरत्वेनभेदेसत्यपिज्ञातेश्वर्योक्त्युक्तिवलेनयदेतदैश्वर्यमुक्तंतस्ययाप्रकाशिकायस्मैईश्वरशक्तिर्यद्दृशाकेचिद्देवतागु
कीरादयतत्तदास्वरूपस्ययाःक्वतिनोभवन्तिसाविद्याशक्तिः अयमेवचश्रीमदुत्पलाचार्यादिहहृद्योप्यस्याचार्यस्यहृदयमावर्जि
यतिपदः अन्येश्वत्वनुक्तेः तथतदानन्तर्योवित्येनचमायातत्त्वनिरूपणम् तदाह ॥ तिरोधानकरीमायाभिधापुनः
मायाशक्तिः पुनः अचिद्रूपेशून्यादौप्रमातृताभिमानंप्रच्छन्दयतीभावानपिचिन्मयान्भेदेनाभिमानयन्तीसर्वथैव
स्वरूपंतिरोधत्तेब्राह्मणेन विमोहिनीहिंसातिरोधानमत्रनविलयरूपंमन्तव्यम् यत्कान्त्यपञ्चकमध्येब्राह्मणेषुगणप्यते
त्वावरणमेव^ दीक्षितस्यापिगुरुमन्त्रादिनिन्दनप्रायमपि ॥७॥ तिरोधानमावरणरूपंस्फुटयति ॥ भेदेत्वेकरसेभातेहन्तयानात्म
नीक्षिते शून्येबुद्धौशरीरेवामायाशक्तिर्विजृम्भते ॥ सुषुप्तेप्रलयेनेत्यभावसमाधौचतादृशशून्यमाकाशकल्पम् चू^
नात्मरूपंवेद्यभावोचितमहमित्यात्मकत्वेनवीक्ष्यते उच्छ्वासननिश्वसनादौवाहंश्वसिमिनिश्वसिमीतिप्राणेवायु
कल्पः स्थावरजंगमसंचित्तामन्त्रज्वलनादौवाप्राणापवतेजः सम्पदेहितः स्वच्छेदकाशायकल्पावेद्यप्रतिबिम्बन
वतीबुद्धिरभिनिविश्यते अन्तरहंवेद्मिदुःखीअहमिति चिन्तायवस्थासु शरीरमेवतत्पृथिवीप्रायंस्थूलोहमित्यादिदे
शास्वहमित्यात्मतयाभाति सर्वंचैतच्छून्यादिवस्तुतश्चिन्मात्रसारमेवमाययैवतावदचिद्रूपतयाभासितंतत्त्वावि
मेवंतुसदहमितिसंविद्रूपताभिनिवेशस्थानंसंपादितं अप्रपञ्चतजडभावमेवेति उक्तमतमवस्तुसंपादनमाप्रतीचातत
रूपापरमेश्वरस्यमायाशक्तिरित्येतद्विजृम्भते इत्यनेनदर्शितम् वाग्रहणेनवेद्यरूपाणांस्तनधनदारादीनामप्य[illegible]
[illegible] हन्ताभिनिवेशविषयत्वमसंख्यातंसूचयति ८ तत्वचिद्रूपत्वादनात्मायदिशून्यादिः तदात्म

३. तयासा विभेतिविश्वमानश्चिद्रूपएवेतिसर्वंतत्वकर्तृत्वादिविमृष्टैश्वर्यधर्मैर्वस्यादित्याशंक्याह ॥ यस्तुप्रमाता
टी. शून्यादिःप्रमेयव्यतिरेकिनि मातासमेयःसत्कालादिकपंचकवेष्टितः ॥ स्यादेतत्सर्वधर्मयोगःशून्यादेःयद्यह
९८ न्य. मिभिनिविश्वमानोपिजह्यात्प्रमेयताम् तथाहि सतिप्रमेयमध्यस्थनीलादिव्यतिरिक्ततयानैवभासते यावतायः
शून्यादिःप्रमा…ताकथितःसयावदेवस्वरूपाद्व्यतिरेकाभिमतेनीलादौप्रमेयेमातातावदेवस्वयमपिमेयभूत
एवसन्माता मेयोहि मीयमानत्वात्परिमितमितितातादृशादेवमेयान्तराद्व्यपन्नव्यतिरेकेनत्वेवंचिद्रूपमपरिमितत्वा
त् परिमितत्वंच शून्यादेरहंभावस्यातत्रदेवकालादिपंचकम् तथाहिकालःक्रममासस्त्रयन्प्रमातरिहंभमाणस्तद
नुसारेणप्रमेयेपिप्रसरति योहंक्षणेभवंसस्थूलोवर्तेभविष्यामिस्थूलतरस्त्वेवमात्मानंदेहरूपंक्रमवंतमिवपरा
मृशन्स्तत्सहचारिणिप्रमेयेपिभूतादिरूपंक्रमंप्रकाशयति …सपशून्यादेर्जडस्यविद्याकिंचित्तोन्मीलनरूपाबुद्धि
दर्पणसंक्रांतंभावराशिंनीलसुखादिंविविनक्ति कलाकिंचित्कर्तृत्वोपोद्बलनमयीकार्यमुन्नावयति किंचिज्ज्ञा
३. नामिकिंचित्करोमी…किंचित्त्वेकर्तुम्…मेवकिंचिदित्यज्ञार्थेप्रभिष्वंगरूपःप्रमातरिदेहादौप्रमेयेच
गुणाध्यारोपणमयश्चरागोध्याप्रियते नचतद्बुद्धिगतमेवैराग्यमेव तद्विस्थूलंचद्वस्तप्रम वायां नभवेदपिरागस्तभ
वत्येवबुद्धिधर्मास्तकेचहहृष्टोभिष्वंगः सुदैवचकस्मादभिष्वंगरूपयमर्यानियत्यातियम्यते इत्येवंकालविद्याकलारा
५. गनियतिभिर्वोत्प्रोतोमाययापहृतैश्वर्यंसर्वस्वःसन्पुनरपिप्रतिविर्तीर्णत्तसर्वस्वरापिमध्यगतभागमात्रः एवं
तोयंमितःप्रमाताप्रतिभाति इदानीमिदंकिंचिज्जानानरूदं…कोरूवचयःसोहमितिपर्षांचभिन्नविषय

त्वमपिभवति कदाचिद्यथान्यत्करोतीत्यत्रान्यत्कार्यंनेत्यपनेचप्रमातृत्वलक्षणतयैवभातीतितत्सैवशक्तिरूपाः
प्रतिप्रमातृभिन्नाएवकदाचित्तुनदमन्त्रप्रेदादावीश्वरेच्छयाएकीभवेयुरपिनह्येषामीश्वरेच्छातिरिक्तंनिजंकिमपि
जीवितमस्तीतिप्रसक्तंकवचनेच ॥ यदुक्तमिदमित्यत्रप्रमेयेव्यतिरेकिणिमातेतितत्रतत्रतत्त्वमेयंदर्शयति
त्रयोविंशतिधामेयंयत्कार्यकरणात्मकम् तस्याविभागरूपैकंप्रधानंमूलकारणम् ॥ यत्कार्यकारणरूपं
त्रयोविंशतिरूपंयच्चतस्यमूलभूतंकारणंसर्वकार्यकरणाविभागरूपंप्रधानंनामतत्सर्वंमेयमितिसंबंधः योगि
मंत्रतदीश्वरप्रभृतीनांहिभूततन्मात्रकरणप्रधानवद्गीकारयोगित्वात्सर्वमेवप्रमेयंसंसारिणामप्यनुमानागमा
दिसिद्धप्रमेयमेवेतित्रयत्वमेयम् कालादयस्तुप्रमेयाअपि प्रमात…बलमिदीतिप्रमातृशक्तिस्वभावत्वात्प्रमेय यं.
त्वेनेहावसरेमायाप्रमातृव्यतिरिक्तप्रमेयप्रस्तावात्तनिगणिताः वस्तुतोह्युत्रयोयंप्रमातापिप्रमेयएवसन्नुप्र
मातृीक्रियमाणश्चाक्षादितप्रमेयताकरहोच्यते २२ नन्वत्रत्रयोविंशतौकिंकार्यंकिंकारणमित्याशंक्याह ॥ त्रयोद
शविधाचात्रवाह्यांतःकरणावली कार्यवर्गश्चदशधास्थूलसूक्ष्मत्वभेदतः ॥ प्रमातुःप्रर्वकरणायेयागाइत्यादे
त्रयोदशकरणानि तत्रबुद्धिरध्यवसायसामान्यमात्ररूपाग्राहकग्रहणाभिमानरूपोहंकारःसंकल्पादिकरणंमनः
इत्यंतःकरणंत्रिधाबुद्धेःप्राग्व्यापाराध्यवसायरूपायामुपयोगीनिबुद्धीन्द्रियाणिपंच श्रोत्रंत्वक्चक्षुर्जिह्वाघ्राणमितिकर्म
णिरूपयोगीनिपंचकर्मेन्द्रियाणितथाहित्यागोग्रहणंद्वयमितिवाह्यविषयंयत्रत्रपायुःपाणिःपादइतिकरणानिप
नदेवानःप्राण्येनक्रियतेतद्वागिंद्रियम् तन्मतोभप्रशंन्याविश्रांतिक्रियोपयोगउपस्थःसर्वदेहव्यापकानिचकर्म

न्द्रियाणिअहंकारविशेषात्मकानितेनछिन्नहस्तोवाक्पाभ्यामादधानः पाणिनेवादत्ते एवमन्यत्केवलंतत्तत्स्फु
टपूर्णत्वलाभस्थानत्वात्संचारस्थलरूपमधिष्ठानमस्योच्यते इत्येवंकरणानित्रयोदशएषांकार्यतेषुसाधारणे चं.
नकरणत्वेनव्यपदेशः स्थूलंकार्यंपृथिव्यापःतेजोवायुःनभइतिपंचभूतानि सूक्ष्ममेषामेवरूपंगंधोरसो
रूपंस्पर्शःशब्दइतितत्रैकैकगुणमाकाशादि एकैकवृद्धगुणंवेति दर्शनभेदः इतितविवेचितोऽनुपयोगात् त
त्रस्थूलंविभक्तमविभागस्थानुसापकमितिस्थूलरूपोपक्रममसूक्ष्मम् तत्रपृथिव्याद्याभासाएवमिश्रीभूयघटा
दिस्वलक्षणीभूताःकर्मेन्द्रियैरुपसर्पिताबुद्धीन्द्रियैरालोचिताः अन्तःकर्मेन्द्रियकरणेनसंकल्पिताभिमतनिश्चित
रूपयाक्रियया विवेचिताः कालादिभिरनुरंजिताः प्रमातरिविश्राम्यन्तीतितात्पर्यम् एतच्चविस्तरतःतत्रस्था
नेषुतन्त्रालोकसारादिषुमयानिर्णीतमिति इहानुपयोगान्नविततमितिशिवम् ॥१३॥ इतिश्रीमदाचार्याभि
नवगुप्तविरचितायामीश्वरप्रत्यभिज्ञाविमर्शिन्यांआगमाधिकारेतत्त्वनिरूपणंप्रथममाह्निकम् ॥ अखंडि
तस्वभावोऽपिविविधोमातृकल्पनाम् स्वहस्तेनोल्लच्छयःप्रथयेत्स्तुमःशिवम् ॥ एवंतत्त्वराशौनिर्णीते बोधपा
तदेतद्भावेनोक्तमपिमुख्यतयानिर्णीतंप्रमातृतत्त्वंविततयानिर्णेतुं तत्रैतन्मातृतामात्रेत्यादिसूत्रानोविश्वात्मकः
परशक्त्येतिविंशत्याश्लोकैराह्निकंप्रस्तूयते तथाहि प्रमातुरत्रस्वरूपप्रत्यभिज्ञानंसम्यगुपदिश्यते शास्त्रे सहिहेयमु
पादेयंचस्वंस्वभावंविद्वान्परमोपादेयरूपंशिवस्वभावंस्वात्मानमभेदेनाविशन्जीवन्नेवमुक्तोभवतीति तत्रश्लो
केनत्रकालादिरूपस्वरूपं ततोऽपिश्लोकद्वयेनहेयोपादेयप्रमातृतत्त्वविभजनम् ततस्त्रयोगिमलस्वरूपंतत्कृ

६५

तंचप्रमातृभेदंश्लोकसप्तकेनद्वयेनसमावेशस्वरूपंश्लोकपंचकेनप्रमातुरेवसपुण्यपापस्यास्त्रयेणतांसंहेयोपा
देयविभागंनिरूपयतीत्याह्निकतात्पर्यम् ग्रन्थार्थस्तुनिरूप्यते ॥ तत्रैतन्मातृतामात्रस्थितेरुद्रोऽपिदैवतम्
भिन्नप्रमेयप्रसरेऽबलविश्वव्यवस्थितेः ॥ तत्रैतस्यैवंभूतेतस्मिन्नागमसिद्धेयुक्त्यनुगतेतत्त्वस्वरूपेसतियदेतत्काला
दिकंचुकवेष्टितंप्रमातृतारूपंतदेवयस्यांशुद्धंउपसंहृतप्रमेयजातंभवति दशायांसंहाराख्यायांतस्यामधिष्ठा
तृदेवतात्वंतदनुसंपादनेनस्वोपासकलोकस्यतद्दशादानेनतद्दशाध्यानावेशसमापन्नस्यस्वाभिमुख्यसंपाद
नेनचभजमानैरीश्वरभट्टारकएवरुद्रोभगवान्योमायापदेऽपिप्राणापानात्मकधर्माधर्मसूर्येन्दुदिननिशादिविषु
क्तमध्यमज्योतीरूपप्रमातृस्वरूपस्पर्शोऽन्मीलिततृतीयनेत्रःभिन्नस्यतुप्रमेयस्यप्रसरेसंपादनेऽधिष्ठातृदेवता
त्वंव्रजन्ब्रह्माप्रसूतेभिन्नेप्रमेयेतत्संतानप्रवर्त्तनलक्षणेप्रसरेऽधिष्ठातृदेवताविस्तःअतएवतयोः प्रमेयप्रसररूप
सेदंनीलमित्येवंप्रकाशात्मनःआध्यात्म्यादहं इतिप्रमातृदशावेशशून्यत्वात्तृतीयनेत्रोन्मीलनम् दैवतेनवदैवतम्
प्रसरउत्पत्तिःसंतानश्च १ यदेतन्मातृतामात्रमुक्तंतस्यविभागमागमिकंचसंज्ञाभेदंनिरूपयति ॥ एषप्रमातामा
यीयःसंसारीकर्मबंधनः विद्याभिज्ञापितैश्वर्यश्चिद्घनोमुक्तउच्यते स्वांगरूपेषुभावेषुप्रमातुःकथ्यतेपतिः मायाप्र
तोभेदिषुक्लेशकर्मादिकलुषःपशुः ॥ माययायोविमोहितोऽतएवकर्माणिस्वात्मनोबंधकान्यभिमन्यमानएव
इतिकालादिवेष्टितःसूक्ष्मादिःप्रमाता संसरतीत्यतःसंसारी देहोऽपिस्वरूपसादृश्यएवाल्पयौवनादिषुवर्तनेय
त्संसरतीव बुद्ध्यादेस्तुजन्मांतरेऽपिसंसरणंविद्ययातुस्वरूपप्रकाशनशक्त्याप्रत्यभिज्ञापदंप्रापितेनैश्वर्येयस्या

६. तएवशरीराद्यपि विश्वमपि वा संवेदनमेवाभिमन्यमानो न एव विदेव चनाश्रन्या चिद्रूपत्वाभिमानाभूत्वायस
ही. सपुनर्जन्मबंधविरहाद्देहेपि स्थितेमुक्त इति व्यपदेशयोग्यः पतितेन शिव एवेक वचन इति कः ज्ञानी मुक्तः भूत
७. पूर्वं गत्वात् प्रमाणं तराये तया मुक्तः शिव इति व्यवहारः यश्चासौ मुक्त उक्तः सभावान्त्वागावदभिमत्वा मानः
प्रमिमीते इति सतेषां स्वामी स्वरूप परमार्थसमर्थनाञ्जुयाल्क इति पतिरुपदिष्टास्ते मायाशक्तिकृतभेदा
न्व्यतिरिक्तानेव सतो यदा मिमीते तदा तैरेव मेयैः पाशैः पाशरूपैः पाशित इति पशुरुक्तः तथाहि वैयराशिवा
प्रादेवाद्यावि[illegible]द्यामितारागद्वेषाभिनिवेशाक्षेपाधर्माधर्मादिरूपाणिकर्माणि
आदिपदाराशायरूपावासनाफलभोगरूपोविपाक इति कालुष्यमनेनप्रकारेयत्नः पाशिनत्वात्पशुरित्युक्तः
यदेवेन पशुरूपंतदेवागमेष्वविधिमलमित्याह ॥ स्वातंत्र्यहानिर्बोधस्य स्वातंत्र्यस्याप्यबोधता द्विधाणवेम
नि° लमिदं स्वस्वरूपापहारितः भिन्नवेद्यप्रथा चैव मायाख्यं जन्मभोगदम् कर्तर्यबोधे कार्मं तु मायाशक्त्या वनत्रय
म् ॥ इह तावत्कलत्रयं तावच्छिन्नमस्य स्वरूपं तस्यापहारो नामाणवं मलम् येनासावणुः संकुचितो ज्ञानस्तत्र स्वरूपस्य
निमीलनं संकोचः तस्मितेवाधरूपकत्वलक्षणस्य स्वातंत्र्यात्मनः स्वरूपं तरस्य निमीलनं विपर्ययोवे भयथा न्तु
णवं मलं स्वरूपापहानिरूपमेकमेव शुद्धेति सत्याणवे मले द्विप्रकारे स्वरूपसंकोचे छन्ने भिन्नस्य यत्प्रथनं त
स्य मायीयमिति से तामातय मायाकृतत्वेन हि मायीयता मलत्रयस्यापि तत्र कर्तृस्वबोधरूपस्य देहादेः भिन्नवेद्य
प्रथने सति धर्माधर्मरूपं कार्मं मलं यतो जन्म च भोगश्च स वनियता वधिक इति जात्यायुर्भोगफलं कर्मैतत्कर्मभव
७.

ति शुद्धेषां मलानो विभक्त विषय निरूपणात् स्वरूपे स्फटीकर्तुं स्वातंत्र्यहानिर्बोधस्येत्यस्य भागस्य तावदविषयमाह
शुद्धबोधात्मकत्वेपि येषां नोत्तमकर्तृता निर्मिताः स्वात्मनो भिन्ना भर्त्रा ते कर्तृतात्ययात् ॥ येषां चिन्मात्रमेव पर
मार्थो न तत्वहमिति स्वात्मविश्रान्त्यात्मकं रूपं परमं स्वातंत्र्यं ते परमेश्वरेण तथाभिनिर्मिताः स्वात्मनः सकाशाद्व्यतिरिक्ताः
प्रवर्हेतः कर्तृताया न म स्वातंत्र्यलक्षणा याशून्यया दभावात्परमेश्वरस्य तु न म स्वातंत्र्या वियुक्त बोधरूपत्व मित्य
भिप्रायशेषः नन्वस्मादेतोर्भवतु परमेश्वरात्तेषां भिन्नत्वमन्योन्यं तत्कथं भेदो बोधरूपस्यापि तत्वनित्यकृतस्य च दे न
शाकालाभेदस्य समानत्वात् अन्योन्यभेदाभावे च निर्मितास्ते इति कथं बहुवचनमित्याशंक्यापोहति ॥ बोधा
दिलक्षणैक्येपि तेषामन्योन्यभिन्नता तथेश्वरेच्छाभेदेन ते च विज्ञानकेवलाः ॥ इह हि सर्वत्राप्रतिहतशक्तिः
परमेश्वर एव तथा भूमिस्तथा भवति न तत्वन्यः कश्चित्परमार्थतोऽस्तीत्यसकृदुक्तम् ततश्च व्यापकनित्यबोधस्व
भावे प्यहंभेदेन निर्भासितस्यैवंभूतेनेश्वरेच्छया भेदेन विशेषेण तेषां शरीरादिशून्यानप्रमातृपदेलीनाना बोधत्व
नित्यत्वविभुत्वादिधर्मज्ञानसैक्येप्यन्योन्यंभेदः ते च शास्त्रे विज्ञानकेवला उक्तास्तत्र विज्ञानकेवलो मलैकयुक्ता
इत्यादौ विज्ञानं बोधात्मकं रूपं केवलं स्वातंत्र्यविरहितमेषामिति एवं स्वातंत्र्यहानिरित्यस्य भागस्य विज्ञानाकला
विषयतामुक्त्वा स्वातंत्र्यस्याप्यबोधता इत्यस्य भागस्य विषयप्रदर्शनेन सस्पष्टयति ॥ शून्यादि बोधरूपास्तु कर्तारः प्र
लयाकलाः तेषां कार्ममलोऽप्यस्ति मायीयस्तु विकल्पितः ॥ शून्ये जडत्वाद् बोधरूपे एव यदि वा प्राणे बुद्धौ वा
येषामहमिति चमत्कारयोगात् कर्तृत्वं ते प्रलयेन कृता प्रकलाः कलातत्वोपलक्षितकरणकार्यरहिताः प्रबो

त्मा

ई. ही. ७१

धरूपाः कर्त्तारश्च प्रलयावधि स्थितेस्तथाभूता उत्तरकालेन कार्यकारणसंबन्धापत्तु भवेति यतस्तेषां न केवलमुक्त
रूपप्राणवपवमलो यावत्कार्ममपि वासनासंस्कारस्वरूपो धर्माधर्मात्मैव यद्येवं भिन्नवेद्यप्रथाप्येषां स्यात्तत्स
संवेद्यस्वरूपे सुषुप्तपदे प्रवेशेन न भवति तेन मायीयो मलस्तेषां विकल्पितो व्यवस्थितविषयत्वेन तथा हि के
पि शून्यादिभागविश्रान्ता गाढनिद्राजडीकृताः सुप्तवेद्यसुषुप्तपदभाजः अन्ये तु बुद्ध्यादिनिष्ठाः स्वप्नः खावशे
षसामान्यात्मकभिन्नवेद्यसंवेदनयोगिनः संवेद्यसौषुप्तपदलीनाः स्थूलदेहेन्द्रियात्मकार्यकरणवियोगात्
त्वेन प्रलयाकललक्षणे सर्वेषां तत्त्वे एवं स्यात्तेषामपि बोधनेत्यनेन संप्राप्तः स्फुटीकृतः । असंगाच्च कार्ममलस्य
विषयो दर्शितः । मायामलस्य च पादिकत्वमुक्तं पशुना पुनरणवकार्ममलद्वयाभावेऽपि शुद्धात्मिमायाख्यस्य
मलस्य विषय इति दर्शयति ॥ बोधानामपि कर्तृत्वं तत्तेषां कार्ममलं तत्तो भिन्नवेद्यन्तु षां मायामलं विशेषरा
श्रुते ॥ ये चिन्मात्रमेवात्मतया पश्यन्ति अहमिति चमत्कारोऽस्य साक्षात्कर्त्तारस्तत एव सर्वज्ञाः सर्वकर्त्तारश्च ते विशे
श्वराः किं तु तत्करणभुवनादियदेषां कार्यं तथा वेद्यतया च भाति तत्कुर्वन्त्यद्रष्टाभिन्नमेव सदित्यालि वि
शेषश्वराणां मायाख्यमलयोगः अथ मलत्रयस्यापि योगपद्येन यो विषयस्तं प्रदर्शयितुमाह ॥ देवादीनां च
सर्वेषां भविनां त्रिविधं मलं तत्रापि कार्ममेवैकं मुख्यं संसारकारणम् ॥ इह विशेषश्वरवित्तानकलात्मावस्था
भविनः मायान्ताध्वानिक्रमणात् प्रलयाकलाश्च पिण्डं विना कालमविद्यमानभवाः ये त्वेते मायातत्त्वान्तरालप
रिवर्तिनो देवादयः स्थावरान्तास्ते तदेशधाम्नस्तेषु परिगणितास्ते सर्वे भविनः संसारिणः तेषां च त्रयोऽपि युगप

७१

पन्मलाः तत्र मलत्रयमप्येकतमो मलः संसरणमेषां संपादयेत्याह तत्रापि तेषु त्रिष्वपि सत्सु कार्मं मलं
मुख्यतया सन्निपत्य संसरणे कारणं यथोक्तं कर्म तत्स्थशरीराणि विषयाः करणानि च तत्करणविषय
संबंध एव च वर्तमानो भविष्यंश्च सत्यनवरतं प्रबंधतो वर्तमानः संसरणमुच्यते आणवमायामलौ तु यद्यपि
तत्कारणं संसारे तथापि कार्मेण विना तौ देहादिविचित्रभावाभिनिवर्तनशक्तिशून्यौ वित्ताना कलादिष्वि
ति मुख्यं कार्ममेव मलं संसारकारणम् तत्र तत्र शास्त्रे गण्यते अत एव तदुपचयहानेदसत्त्वादसंसरणासं
पादनपदबंधइत्याशयेन कर्मबंधाभिमानपरिहारनिरेव यत्नतः सांख्यपुराणभारतादिशास्त्रेषु प्रदि[illegible]ते ष्प.
एवं मलत्रयस्यैकैकभेदो द्विद्विभेदस्त्रिभिस्त्रिभेदेनैकेनेति सप्तप्रमातार उपदिष्टाः तथा च शास्त्रेषु सकला
दिशिवान्ताः प्राक्तिमेनः समेस्युक्तं तत्राप्यवान्तरभेदेन गुणमुख्यताभेदेन विकल्पसमुच्चयादिभेदेन चा
नंतप्रकारत्वमिति ८ अस्य च मलत्रयस्योद्भवतिरोभावभेदात्संसारिणां प्रकारद्वयमिति दर्शयति ॥
कालोच्छलितमेतच्च विश्वं तत्कर्तृतामयं अचिद्रूपस्य शून्यादेर्मितगुणतयास्थितं मुख्यत्वेन कर्तृतायास्तु
बोधस्य च चिदात्मनः शून्यादौ तद्गुणत्वेन तत्समावेशलक्षणं ॥ एतच्चेति ये विद्दशादीनां भविनां चे
तत्स्यैकर्तृतां शास्य प्राधान्यान्मलेन संविद्भागस्यातिमज्जितत्वात् कर्तृतामयं चिद्रूपस्य तत्त्वस्यांतःकलुष्येन परमे
श्वरशक्त्यात्मना तत्त्वेनोच्छलितमनुप्राणितं मनुप्राणितं मलेन न्यक्कृतम धिष्ठितं शून्यादेर्देहपर्यंतस्य माया उ.
प्रमातुः संवेदितद्गुणत्वेनाप्रधानत्वेन स्थितं यतो मितमिदंतापत्रदेहादिशून्यांतप्रमेयभागनिमग्नत्वात्

क.

प्रमेयेयोगोचरः सर्वीयस्तथिनोयः सर्वज्ञपरहितः सोहमितिद्विजदेनेवोन्तर्लीनाहंभावासंसारिणंपरिस्फुरतिसे
यंजाग्रत्स्वप्नसुषुप्तरूपासंसा[illegible]रावस्थायदात्वक्रमगुरूपदेशादिदिशा तेनैवाहंभावेनात्यात्मना व्यापकत्वनित्य
त्वादिधर्मपरामर्शमात्मनि विदधता ततः शून्यादेः प्रमेयाद्भ्यन्वयेवावस्थते तदा तुर्यातीतावस्था यदापिपरामृष्टत
याभूतदेभवतित्यक्तैश्वर्यादिधर्मसंभेदेनैवाहंभावेन शून्यादिदेहधात्वंतंसिद्धरसयोगेनविध्यते तदासातुर्यादशा
प्राप्यंतदपिप्रमेयतामजहाति इवसेयंद्वय्यपिजीवन्मुक्तावस्थासमावेशाद्युक्ताशास्त्रेसम्यगावेशनमेवहितत्र
तत्रप्रधानम् तत्सिद्धयेगुरुपदेशांतराणि यथागीतेमय्यावेश्यमनोयेमामिति श्रयावेशाधितं वित्तमित्यादि च
समावेशापन्नावाप्यवच प्रसिद्धदेहादिप्रमातृभागप्रक्षीभावभावनानुप्राणिताः परमेश्वरस्तुतिप्रणामपूजाध्या
नसमाधिप्रभृतयः कर्मप्रपंचाः गृहीतमप्यभ्यासेप्यसमर्थः सत्त्वमत्कर्मपरमोभवेति देहपातेतु परमेश्वरएवैक
रसइति कंचुककर्षसमाविशेत् तदेतदाह यस्तुनः कर्तृतायामुख्यत्वंतन्नांतरीयकशून्यादेरुणभावस्तसिद्ध्य
चिद्रूपेगुणीभूते सातत्यप्रथाप्यवोधनेनिमलव्याप्तस्यामहत्स्तनाच्छितोयोपरोप्यात्मभागोवोधलक्षणोमलेनन्या
१ कृतोभूतस्याप्यपुनोत्मग्नत्वेनमुख्यत्वेयच्चनकर्तृतायामुख्यत्वे न्मग्नता इदमेवतात्मतानात्मकमलप्रतिपदनात
तदेतन्मुख्यत्वं समावेशास्यलक्षणंयेनदेहस्थितोपिप्रतिरिति मुक्तःशतिशास्त्रेषूक्तः नन्वेवंयत्तुसमावेशात्मिकान
धंतदतीतरूपाभवतदशा यद्योत्सकथंसषुप्तस्वप्नजाग्रद्दशाभेदस्यागमेप्रकटस्याशंकाप्यसषुप्तस्वरूपमेवतावदाचष्टे
श्लोकत्रयेण ॥ शून्येबुद्ध्यायभावात्मन्यहंताकर्तृतापदे अस्फुटरूपसंस्कारमात्रिणिज्ञेयशून्यता सा त्वाणामे ७२

७३

तरीश्च त्रिः प्राणादिप्रेरिकासता जीवनाख्याप्यवाप्राणेहंतमुर्यष्टकात्मिका तावन्मात्रस्थितोप्रोक्तःसौषुप्तप्रलयोपा
मे सवेद्यमपवेद्यंचमायामलयुताऽयुतम् ॥ इहचिन्मतत्त्वस्वरूपमाच्छादयत्तेयरूपेणवुद्ध्यादिनादेहादिनावादिना
चभासते एकमेवचेदंसातंत्र्यविजृंभितं नतत्रवास्तवः क्रमोवाभेदोवातथापितत्स्वातंत्र्यात्क्रमस्यभेदस्यभासने तदे
वंस्थितेयश्चित्तत्त्वस्यस्वरूपाच्छादनभागः सएवोत्तरभागांतरासंकीर्णो यदाविश्राम्यतितदनुदयादानत्वधंसाद्वा
प्रलयेश्वतदना[illegible]देराद्वानिद्रासमाधिमूर्छादाविवतत्रैवचाहंताद्रूपे कर्तृतायाः
पदेपरामर्शोस्फुटत्वादरूपात्मनासंस्कारेणवृहेनवेद्यपदवीमप्राप्तेनयुक्तोभवति तदासैवावस्थानेत्येवंपरा
मर्शप्रोषानपेक्षितनिषेध्यवुद्ध्यादिविषयस्यहपरामर्शसंभेदाप्यवरूपभावि निषेधयोगादकिंचनोहमित्येवं
भूतपरामर्शीवत्सीकृतसामान्याकारनिषेध्यातपवसंस्कारशेषीकृततेयरूपाशून्येपरस्थ्यते तथाविधेवुद्ध्यादी
नोदेहादिनीलाद्येतानोप्रभावरूपेशून्यत्वमुच्यते यतस्तत्रज्ञेयानोशून्यताभावरूपतासंस्कारशेषता इयमेवा
हिसर्वज्ञाभावोनतुसतोसर्वात्मनाविनाशः तत्रैवशून्यप्रमातरिसमवेताप्राणापानसमानोदानव्यानात्मा
केवायुचक्रेप्रेरणात्मिकाशक्तिः साचविद्याकलयोः प्रपंचभूतेयोक्रमेणवुद्धीन्द्रियकर्मेन्द्रियवर्गौतयोरांतरी
भूतनिर्वाहसाहितयोः ग्राह्यग्राह्यालोचनशब्दाभिव्यंजनरूपातामीहतनादिकावृत्तिः तदुक्तंसामान्याकरणवृत्तिः प्रा
णाद्यावायवः पंचेतिएवंशून्येएवाहंतादचक्रोपोहलितजीवनमितिसंशून्यएवजीवःसंसरतियः यदिवं

ई. न्द्रियशक्तीनामेवयांतरीसाधारणप्राणनात्मिकाप्राणशब्दवाच्याप्राणादिमारुतविशेषप्रेरणामयीसैवबु
प्र. द्धमित्यधिशय्यमानाजीवनम् तदाप्राणएवजीवःसंसारीसएवपुर्यष्टकशब्दवाच्यः प्राणा
७३ दिपंचकंबुद्धीन्द्रियवर्गःकर्मेन्द्रियगणोनिश्चयात्मिकाचधीर्बुद्धिरुच्यते तन्मात्रपंचकंचमनोहंबुद्धय
इत्यष्टौ तन्मात्रेंद्रियरूपेणमनोहंबुद्धीतिभूमिरापइतिचवदंतः एवंयदुभयात्मकंपुर्यष्टकंतावत्येवसु
षुप्तेयाविश्रांतिस्तस्यांसत्यांयददेता यः सुषुप्तावस्थायाःबोधलक्षणोभावरूपेकर्मचक्रियाशक्तिस्वभावं तेसौ
षुप्तंमलेनहिप्रमातासमःकलयात्वसमः इवातत्रनिमज्जनेनसुषुप्तसमस्तस्याभावःकर्मवेतितत्रशून्यसौ
षुप्तेनकिंचिद्यतिरिक्तंवेद्यमितिमायीयमलाभावादपवेद्यंतत् प्राणसौषुप्तेतुस्पर्शकृतस्यसुखादेःसंवे
दनाभावान्मायाख्यमस्तिमलमितिसंवेद्यंतत् एवंगाढागाढसुषुप्तद्वितयवत्प्रलयोपिमंतव्यः सपरंदेहादि
प्रध्वंसात्तदयकृतश्चिरंतनकालस्थसुषुप्तंतदेहाद्यनादरकृतमचिरकालंचेतिविशेषः तत्रापिश्रमकृतंत
न्निद्राधातुदोषकृतंमूर्छाद्रव्यकृतमदोन्मादादिसंतानंत्रयकृतंसमाधिपरिपाट्यवांतरभेदाः केचित्तुसमाधिरूपं
संवेद्यमन्यदपवेद्यमितिप्रपन्नाः ॥ नन्वेवंस्फुटवेद्यपदविनिर्मुक्तासुषुप्तावस्थाऽलक्ष्यस्वप्नजाग्रद्दशयोस्तस्फुटवे
द्यावभासयोर्योगिन्याः कोभेदइत्याशंकांशंकाकुद्दयेनभेदमाह ॥ मनोमात्रपथेप्यक्षविषयत्वेनविभ्रमात् स
ष्टावभासाभावानांस्वप्नस्वमपदंमतं सर्वाक्षगोचरत्वेनयातुबाह्यतयास्थिरा सृष्टिःसाधारणीसर्वप्रमातॄ ७३

णांसाजागरः ॥ बाह्येंद्रियाधिष्ठानानि तावच्चक्षुर्गोलकादीनिनिमीलितानिनिद्रायमाणस्यलक्ष्यंते चतेषु
निमीलितेषुबाह्येंद्रियग्रहणव्यापारोदृष्टः तेनस्फुटएवमनोमार्गेरूपस्पर्शादयोभावाग्रहणस्मृदितेनस्पष्टे
नवपुषाभासनयोग्याः परमेश्वरेणसृज्यंते नत्वणुना निष्टस्यैवदर्शनादिष्टस्यापिदेशकालांतरादियोगेनस्था
तएवमनोमात्रस्थितत्वादेवतत्प्रमात्रेतरसाधारणीयंसृष्टिः यत्तुतत्रबाह्येंद्रियविषयत्वेप्रमात्रंतरसाधारणंचच
कास्ति तद्यद्यपियावज्ञाति तावत्तथैवतथाप्युत्तरकालेप्रबुद्धस्यनतथेतिपरामर्शेनतद्रूपंनि लत्वेनावभाती त्वे
सं. तिभ्रांतम् यानि हि स्वप्नमात्रेतराणिस्वप्नेन्द्रियाणिचभांतितानिप्रबोधकालभाविभिरेवचतैरभिन्नानीतिनि
श्चयः प्रबोधकालेचनतथेतिनिश्चयात्तद्बाधात्मिरूपासैव तेनोभयमपिभ्रांतमुच्यते भ्रांतत्वमेवचास्थैर्यं
एवमिंद्रियाविषयत्वेनैवसाधारणत्वमात्रिमं विभ्रमेणैवचास्थैर्यमितिखंडंतत्तज्जाग्रत्वेतियोगिधर्म
निरूपणावसरेपिनदर्शितं एवंभूतायासृष्टिसाद्यशोःस्वप्नसमयेभावात्स्वप्नपदंस्वप्नकालेविषयइतितथा
भूतविषयेप्रमातृत्वंपशोःस्वप्नावस्थेतियावत् प्रत्यग्रहणंबाह्येंद्रियदशकस्योपलक्षणं प्रवृत्तवाह्यातरा
वंच. द्विषयेसर्वप्रमातृसाधारणेनिश्चयात्मत्याबाधाविरहितयापारमार्थिकत्वेनचकास्ति ततएवस्थैर्यंविष
यस्यसासृष्टिःपशोर्जागरः तद्विषयप्रमातृत्वंपशोः जागरा वस्थेतियावत् यावच्चात्महनिस्थैर्येनिश्चयस्यचका
स्तितावज्जागरा तन्मध्यएवनिश्चयात्महानिनिर्मूलनात्स्वमइत्यवभाससमारत्वाद्धस्तुतोस्वप्नेपिदीर्घेयत्रस्वप्नां

ई॰ प्री॰ ७८

तदेतत्तदेव तथा जाग्रदेव जाग्रदभिमतमपि वा दीर्घदीर्घकालान्तरे निश्चयात् उच्छमिति रोधात् जाग्रदन्तरापेक्षया स्वप्न एवेति
मन्तव्यम् प्रसंगात्तु स्वर्गादेर्यत् प्रदर्शनेन तदवस्थातः प्रभृति उपादेयत्वं सूचयति ॥ हेयात्मीयं प्राणादेः प्राधान्या
त्कर्तृतागुणो उदानोपचये प्राप्य स्वावेशः स्वाद्वियोगजः ॥ तत्रायं प्रमाता त्यागोपादानतदिच्छाप्रयत्नात्मकं परि
च्छेद्यं प्राप्य पतितदेवास्य हेयतया भाति स चास्य स्वावेशः स्वयोगवैचित्र्येणैव कृतः तेष्वन्तदवस्थात्रये संभवति यतः
कर्तृतारूपं स्वात्मविश्रान्त्यतत्स्मि स्वलक्षणमात्रं देकत्वं नेयत्वं मयं वपुः तत्प्रदा प्राणादिहृत्निष्ठत्वपुर्यष्टक
देहादि भूमि गुणतामभ्येति तत्तस्मिन्भूतीभूते प्राणादेः प्राधान्यं स्फुरति तथा च तस्य हि रूपस्य यथा यथा ह्या
निस्तथा तथाहंः स्वोपचयः यथा यथा किंचिदुन्मज्जनं तथा तथा स्वोपचयः तथा हि भुक्तादिकाले प्राणस्थे
बोद्धेकाहंः स्वत्वनिमित्तस्यान्याभावाद्देहत्वेदेकेन स्वमेवेत्यान्तस्यमर्दने देहप्राधान्यप्राधान्येसं तत्ख्यत्स्वसमावेशान
न्तन्तस्य तत्कालेहंः स्वानुदय एव यदाह दुर्बलोपि तदाक्रमेति प्राज्ञादयेदुभुक्ताचेति एवं प्राणादेः प्राधान्ये क
र्तृतायां गुणभावेस्वावेशः स्वैर्वेचित्र्यशतयोगः प्रयासभूमि रिति जाग्रत्स्वप्नसुषुप्तेषु प्राणादिप्राधान्यं कर्तृतान्य
स्यभावश्चास्तीति तद्द्वयं हेयमेव कर्तृताप्राधान्योन्मेषात्तु तुर्यरूपात्प्रभृति तत्स्थैर्यपीतीतदर्शं तत्प्रपादेयमेकरसा
नंदघनस्वभावलाभ उपादित्साजिहासावेव च पश्यपरिश्रमप्रशमादिरितितात्पर्यम् ननु प्राणादिप्राधान्यं हेयता ति॰
योकारणमुक्तं तत्र जाग्रदादिविषय एव तत् हि तर्यादौ तदभावात् समावेशोन्यानानु पतिरिति श्लोकद्वयेन परि ६४
पि॰

कृत्यमृगमतत्रेविविद्धियपूर्णसंउद्भवन्निष्ठाउःसौषुप्तमिति उद्धूप्राण्यापानयेदच्छेदविसृत्तिः

हरति श्लोकाभ्याम् ॥ प्राणापानमयः प्राणः प्रत्येकं सुप्तजाग्रतोः तच्छेदात्मा समानाख्यः सौषुप्ते विषुवत्त्विव मध्ये
र्ध्वगाप्युदानाख्यस्तुर्ये सोग्निमयः विततानाकलं श्रेष्ठो व्यानो विश्वात्मकः परः ॥ प्राण इति प्राणनरूपाजीवा
त्मस्वभावायेयं चिद्रूपस्य स्थितिस्सा तावत्सामान्यपविसंहरूपा देहप्राणादेश्चेतनस्य चेतनायमानतासंपादना
त्मिका हमिति स्वातंत्र्यारोपसारा सती विकल्परूपपरामर्शमयी सैव प्राणः इति विशेषसंज्ञात्मना यं च रूपतां भज
ते तत्र किंचिज्जहातीकविन्यतेती तदिदं विशेषद्वयं जाग्रति तावत्स्फुटमेव देहात्मस्य विषये विश्रान्ते स्वा
तोपि देहे स्मृत्यादौ वा ग्रन्थं तत्र एवं वेद्ये विश्रान्तेः प्राणापानयोः स्वस्पष्टत्वात् स्वप्नेपि तद्द्वयमस्त्येव स्वपतो
पि हि प्राणापानौ निर्गमप्रवेशात्मानौ स्फुटमेवापरेणलक्ष्येते स्वयमेव च वेद्यसंवेदनात् त्यागोपादानरूपा
स्थितिः संवेद्यत एव तेन प्राणेनाप्राणापानविशेषद्वयमयी जाग्रति तथा स्वप्नेपि सूक्ष्मः तदेव तु यदा सन्त
तं सुषुप्तं भवति तदा सुषुप्तः प्रमाता तत्सौषुप्तं पदं तद्द्विविधमपि समानरूपं विशेषं प्राणोपि स्वीकरोति स च
ये तावत्सुषुप्ते यत्र प्राणापानसंचारो लक्ष्यते तथापि तयोः मध्ये या विश्रान्तिः कंचित्कालं तदात्मा सकल
रसादिवर्गस्याधारतयैव समानीकरणव्यापारात्मा तत एव तत्स्यविकासदानाद्दग्नपीतन्नरसकारी समा
नो दिनरात्रिरूपयोः प्राणापानयोः कंचित्कालं साम्याद्विच्छेदात्तु विषुवत्कालतुल्यः विषुंव्याप्तिं समानीक
रणमर्हतीति तदहमिति वृत्तिः उपमानवचनेरेव च वायुयत्नमुक्तौ निवतश्रुतिप्रयोगात्राद्धिम्यायसिद्धं न वाच्य

ई. टी. ७५

तिकं विशेषं वादिनश्चाविनष्टत्वाधिकत्वलक्षणं सन्नतिशेषयति प्रविरतमिति प्राणरीविषुवत् तत्र च विषुवति वि
क्रियमानस्य प्राणापानस्य संस्काररूपतया सद्भावः सैव हि किञ्चिद्देवेन तत्सर्वात्मना नाशो लीनत्वक्रमस्य सत्त्वात् ततश्च
दानादानयोर्बीजरूपतास्य शेषयति च सर्वःप्रलयाकलोन्तःपञ्चवर्गः यदा तु सा प्राणना हृदिः वामदक्षि
णमार्गौ विलीनभावयन्ती मध्यरूपेण ऊर्ध्वे न प्रवहति तदा न च वहत्वं [illegible] सकलस्य भेदस्या
भेदसारस्यानतालक्षणं विलापनमात्रं प्रानस्येव सर्पिषो विध्वतीतदा नष्टनिर्विज्ञानाकलाद्यारभ्य सदाशि
वान्तम् सा च तुर्यात्मिकादशमायोर्ध्वेहि विज्ञानाकला [illegible] तितनःप्रभृति भेदगलने प्रवर्तते विलीने तु भे
देसर्ववेद्यराशिरूपं प्रभूतभुवनवर्गात्मकदेहव्यापनरूपेण निर्व्यानरूपा विश्वात्मकपरमशिवो चितात्त प्राण
ती यानरूपा प्राण एवं प्रमाता प्राणापानरूपः समानरूप उदानरूपो व्यानरूपश्चेति सामानाधिकरण्यात् वि
ज्ञानाकलस्याशेषमंत्रस्य सैव र्गापेक्षयाईशस्य सदाशिवेश्वररूपतया यो सावितिसतदा न पतङ्कं भवति य
द्यपि तुर्यं तदतीतयोर पि प्राणनान्यथा जीवत्वस्यानुपपत्ते: तथापि भेदोपसंहारेण भेदवि
श्रान्तिप्राधान्यादनयोः सुखडः ख्यादिवैचित्र्यायोगादेकत्वेन स्वात्मकपरमानन्दमयत्वेनोपादेयत्वेन वस्वमाते विश्राम्भाउ
तसंस्काररूपत्वास्फुटवेद्यांशास्य स्फुटवेद्यावभासरूपस्य भेदस्याविर्यमानत्वाद्यास्ति सुखडः ख्यादिवैचित्र्यमिति
हेयत्वेनैवेति युक्तमुक्तं हेयात्तुर्यामित्यादि भगवतश्च विश्वशरीरस्य प्राणापानसमानोदानव्यानरूपतया एव ७५

सकलशतोज्ञासप्रवेशप्रलयाकलविज्ञानाकलादिवर्गसदाशिवरूपता इत्यनेन दर्शिते यथोक्तं षड्विंशदा
त्मके विश्वं शम्भोः प्राणादि शक्त्यय इति ॥ इति श्रीमदाचार्याभिनवगुप्तविरचितायामीश्वरप्रत्यभिज्ञाविम
र्शिन्यामागमाधिकारे तत्त्वनिरूपणं द्वितीयमाह्निकम् ॥ समाप्तश्चायमागमाधिकारस्तृतीयः ॥ अनन्तमान
मेयादिस्वैचित्र्याभेदशालिने आत्मानेयः प्रथयते भक्तानां तं स्तुमः शिवं ॥ एवं स्वसंवेदनोपपत्त्यागमसिद्धम
त्र्येण हेश्वररूपमात्मस्वरूपं यदधिकार [illegible] वितत्य निर्णीतं तदेव संक्षेपेणाशिष्यबुद्धिषु निवेशयितुमागमार्थ
संग्रहं श्लोकाष्टादशकेन दर्शयति स्वात्मैव सर्वजन्तूनामित्यादिनोत्पलेनोपपादितेऽस्मिंस्तेनैकेनाह्निकेन तत्र
श्लोकेन पारमार्थिकं स्वरूपमुक्त्वा श्लोकनवकेन बंधस्वरूपं प्रमातृप्रमेयतत्त्वदर्शनदिशा सप्तकेन प्रत्यभिज्ञा
त्मकं मोक्षं तत्रं श्लोकेनोपसंहारं दर्शयतीति तात्पर्यम् ग्रंथार्थस्तु निरूप्यते ॥ स्वात्मैव सर्वजन्तूनामेक एव
महेश्वरः विश्वरूपोऽहमिदमित्यखण्डामर्शबृंहितः ॥ इह जडस्तावच्चेतननिमग्न एव भाति इदमिति हि जडाप
रामर्शो हि सा संवित्परामर्श एव विश्राम्यति ततश्च जडानि रात्मान इति जीवा एव जीवाः स्वात्मानस्तेषां च महेश्वर
एव स्वात्मा स एव च महेश्वरो न त्वन्यः कश्चित् यतः संवित्स्वभावोऽसौ संविदश्च न देशेन कालेन स्वरूपेण कोऽपि भेदः
कामं देहप्राणबुद्ध्यादयो भिद्यंतां ते तु जडतया चेतननिमग्ना एवेत्येक एव चिदात्मा स्वातन्त्र्येण स्वात्मनियतो विश्व
ह रूपेण भासयति ततो महेश्वरोऽन्तर्गणितामिदंताकृत्वा परानुन्मुखस्वात्मविश्रान्तिरूपाहंविमर्शपरिशीलनत एव सः

नि.

ई. र्वेत्तृत्वसर्वकर्तृत्वेनास्य यत्तोयपायो विचित्रबुद्धिकर्मेन्द्रियविषयेद्रियथा तत्तत्कर्तृत्वेपकर्षो वात्मनस्तथाद्रिन्द्रिय
टी. स्थानीयरूढ्देवत्नसहस्र विषयस्वभावराशेर्यज्ञानेकरणे च तदेकत्र चिदात्मनीति । ननु यदेकमेवायं महेश्वररूप
७५ स्तात्माकस्मादिहविबोधय वेमोचनायाय मन्त्रमइत्याशंक्याह ॥ तत्र स्वस्य प्रेदंभागे बुद्ध्यादिग्राहकात्मना ग्रहेकारप
रामर्शपदं नीतमनेन तत् ॥ न त्वेवं स्वात्मनि महेश्वरे स्थिते तस्मिन्नेव प्रकाशरूपे स्वात्मदर्पणे तेनैव परमेश्वरेण
स्वातंत्र्याद्रावत्स्वः संकोचप्रः सत्वदंभागस्तन्मध्ये यदेतद्बुद्धिप्राणदेहरूपमिदं तया वेद्यं तद्भिन्नस्य वेद्यस्य ग्राह
स्त. कतया समुचितमिदंभावाभिभवाप्रभविस्तत्वा तदेकेनाप्रेर्णेनाहंभावेन परामर्शेन भासमानं च कालिस्त्र इदं देव
दर्शाहं चेत्यइति २ नन्वेवमप्यस्तु तथापि कस्यवं धर्मईश्वरव्यतिरिक्तो हि कोन्योस्ति तदेतत्परिहर्तुमाह ॥ सत्वर
पापरिस्तानमयोनेकः प्रमाणमतः तत्र स्वस्योक्तियानंदो भोगो दुःखमात्मकः ॥ सत्यं परमार्थतो न कश्चि
द्वंधः केवलं स्वस्मादनन्तरात्मातेयाद्यदा स्वात्मानं संकुचितमवभासयति स एव तदा स्वस्वरूपस्वरूपस्यांदप
रिस्तानेभासमानत्वेप्यपरामर्शरूपेन देवकारणत्वेन प्रकृतेयस्य संस्पर्शणत्वात्ख्यातिमात्रेतत्त्वः पुरुषश्चोच्यते स्वतय
वानेकः तत्र देहप्राणबुद्धिविशेषेण संकोचग्रहणात् स च प्रमाभोक्ता संवंधं भोगलक्षणमनुभवति भोगश्च
नाम तस्यैव कल्पितो क्रियानंदो कल्पिता क्रिया दुःखं विरुद्धोहि प्रकाशाप्रकाशावोचलरूपं दुःखमुच्यते प्रकाशरूप
चसत्त्वं सत्त्वेतमस्तु प्रकाशरूपो मध्ये विश्रामः प्रलयस्थानीयः ३ ननु स्वभावित्वेनेन किंन्यवच्छेदो किंचसंग्रहः ७६

मित्याह ॥ स्वांगरूपेषु भावेषु पत्युर्ज्ञानं क्रिया च या माया तृतीये ते एव पशोः सत्त्वं रजस्तमः ॥ विश्वरूपस्य भग
वतः स्वरूपभूत एव विश्वत्रयः प्रकाशो यश्च विमर्शस्ते ताविज्ञानं क्रिये रूपत्वपरामर्शापरित्यागेनैव तत्र यद्भिन्नतया स्व.
पि विमर्शनं स्वरूपपरामर्शेप्येव विश्रान्तमहमिदमिति सदाशिवेश्वरपरमार्थ्यं सा भगवतो माया शक्तिः तायताः
तिस्त्र शक्तयो भगवति नैसर्गिक्यो हि ज्ञाः स्वरूपापरित्यागेन तु भिन्नेषु भावेषु ज्ञानं क्रिया च इदमेव भिन्नत्वेप्रकाशविमर्शस्व
न्यत्वमिति पशोः प्रकाशः प्रकाशाप्रकाशो प्रप्रकाशस्थितिक्रमेण सुखदुःखमोहलक्षणानि प्रकाशक्रि
यानियमशीलानि सत्त्वरजस्तमांसि ननु चैवं सति पशोः परमेश्वरस्य ज्ञानक्रियामाया अव्यतिरेकिन्याः शक्ति
यश्चोच्यन्ते तद्वत्पशोः सत्त्वरजस्तमांसि प्रसज्यन्ते व्यतिरिक्तानि च तानि गुणत्वाद्गुणत्वेन तदेतत्कथमिति सं
शयं शमयति ॥ भेदस्थितेः शक्तिमतः शक्तित्वं नापदिश्यते एषां गुणानां करणकार्यत्वपरिणामिनाम् ॥ प्प.
सत्यमेवं स्याद्यदि भेदप्रदानं भवेत् भेदव्यवहारस्त्वयं विचार्यते तत्र च चिन्मात्रसंकुचितस्वभावः पुरुषो नास्यैव स
र्गिकं भावविषयं प्रकाशानादिरूपं सर्वदा तत्संसर्गात् अपि तु न्यसंवेधकृतम् ततश्च तस्मात्पशोः शक्तिमत्ता
न शक्यमानाज्ञेदेन यत्तपतानि सत्त्वादीनि ततः शक्त्यो व्यतिरेकस्वरूप इति नोच्यते किं तु पकरणत्वाद्गुणशब्द
ते. च्यते ननु पुरुषात्किमिति भेदेनोच्यते उच्यते इह सुखदुःखमोहपरिणामरूपमेतत्करणत्रयोदशकं कार्य
दशकं च सत्त्वादि स्वभावत्वेनानुभूयते इति सुखदुःखमोहाः करणकार्यवर्गतादात्म्येन येयोयदि पुरुषस्य

ई. पितादात्म्यभंजेरेस्तर्हि पुरुषः कार्यकारणपर्यंतस्थितिमयः संपन्नः परिणामश्च इह स्थितः इति स्वातंत्र्यशात्मा पुरु
टी. षो विश्वरूपः इत्यायातम्‌ तथा च न कश्चित्पुरुष ईश्वर एव तस्मादप्रत्यभिज्ञानमयपुरुषस्वरूपविचारे सत्त्वादेयो
७७ भिन्ना एवेति स्थितम्‌ ५ ननु ज्ञानादीनि कथं सत्त्वादिरूपाणि पशोः प्रतीत्याह ॥ सत्त्वानंदः क्रियापत्युस्तदभा
वोऽपि सा पशोः दुःखात्मा तदज्ञोऽतः स्वेच्छे विसत्त्वतमोमयम्‌ ॥ इह तावत्पतिर्विश्वस्यावभासनेनैव विश्वोत्तीर्ण
त्वस्थादिना पालयिता स्वप्रकाशस्वभावस्तस्य विश्वपतेर्या सत्ता भवनकर्तृता स्फुरत्तारूपा पूर्वं व्याख्याता
सा स्फुरत्ता महासत्तेत्यत्र सैव प्रकाशस्य विमर्शाव्यतिरेकाद्विमर्शात्मकचमत्काररूपा सती क्रियाशक्तिरुच्य
ते परैरप्यत्यागेन स्वात्मविश्रांतिरूपत्वात्सैवानंदः तदेवं भगवतश्चिदात्मनैवेयद्रूपा पशोस्तु सत्त्वात्तद
...त्यानंदश्च तदाभावश्च संकुचितचिद्रूपत्वात्‌ तेन यासौ सत्त्वानंदभागस्तत्प्रकाशस्तदवहृतसत्त्वम्‌
यस्तदभावस्तदावरणमोहरूपं तमः ते एते सत्त्वतमसी नीलानीलवत्परस्परपरिहारेण यद्यपि वर्तेते तत्कार्यं
त्वकारणत्ववनमथाप्येकपरामर्शगोचरी कार्यधर्म्यपेक्षया चित्रपतंगसंगतनीलानीलात्मकरूपत्वायेना
न्योन्यमिश्रतयापि भातः अतो यो यं द्वयस्यात्मा मिश्रस्वभावस्तद्रजोगुणः अतएव प्रकाशाप्रकाशस्वरूपा
योः सत्त्वतमसो रक्तेषेणावस्थानमिति दुःखत्वम्‌ प्रियपुत्रादेरेकत्वतएव हि प्रकाशस्सुखम्‌ एकत्वतय
वहि प्रकाशो मोहः यस्तु कथं चित्प्रकाशो यथासव्याधिकदेहरूपतया नाभिमतया कथं चित्प्रकाशो

यथागंतगदकल्याणधर्मयोगितयाभिमतया तदेव दुःखत्वम्‌ अ... एव च पूर्वापरीभावसारः क्रियापर
मार्थः अत्रानुभवरूपतया स्तिप्रतीतो लोकस्यापि कल्पिताकल्पितरूपा यो अंतःप्रवेशाम्नस्य तथा हि नीलं
तावदकल्पितरूपा धियि विभाति नीलाभावस्तन्वेऽपि कल्पनाकल्पितो भासमानत्वात्‌ ताव्यवहार
परमार्थः तदुभयस्यामिश्रणात्तु नीलानीलं भात्विति नाम यत्तु अनुभव...रूपतन्नीलप्रतीत्यात्तावदकल्पितया
न विषयीकृतं तेन तत्कल्पितामनीलधियमनुधावेत्‌ अथ तां कल्पितां धियं नाविशत्यकल्पितया धिया विष
यीकृतं ते नीलमेव स्यादिति न पशोश्च तयोरस्ति गुणः अपि स्वार्थं पशोः सा सत्त्वा सत्त्वं तदभावस्तमो द्वयात्मा रज
श्चेति संबंधः ८ एवं तावत्पतिपशुरूपप्रमातृतत्त्वे संक्षेपेण निर्णीतम्‌ अथ प्रमेयतत्त्वं निर्णेतुं प्रत्येतावद्विश्वा
मिदं प्रमेयतत्त्वमिति निर्णेतुमाह ॥ येऽप्यसामयिकेदंतापरामर्शभुवः प्रभोः ते विमिश्रा विभिन्नाश्च तथा
चित्रावभासिनः ॥ इहाभासा एवार्था इत्युक्तं ते च परामर्शैकेन कदाचिन्मिश्रीक्रियंते यदा विशेषरूपता कदावि
द्विमिश्रा एव परामृश्यंते यदा सामान्यरूपता ते एते उभयात्मानोऽपि सामान्यविशेषात्मानोऽर्था असामयिकेना
कल्पितेनेदंभावेन सहजभेदपरामर्शरूपेणांगुलिनिर्देशादिप्रख्येन गोचरीकार्याः प्रभोरपि न केवलं संयो
ज्ञानबलादेर्यावदीश्वरस्यापि तथा तेन सामान्यविशेषप्रकारेण चित्रतयावभासंते चित्रत्वं हि तयोः यन्मिश्र
त्वे अमिश्रत्वे च युगपदेकाहंताविश्रांतं भाति निरीश्वरदर्शने योऽभावो स्वसंतरीयकत्वेन संवित्संकोचरूपं निषे

ध्यानपरत्वेनार्थमात्ररूपं प्रत्यक्षं संवित्प्रकाशेनैव प्रकाशमानं अहंता निषेधयामसामयिकीमिदंतामुल्लासयति १
एवं तावदीश्वररूपस्य परमशिवस्य प्रमेयतत्त्वं परमशिवेन भगवता प्रमेयकथैव कथमुन्निद्रेति प्रमेयकथोन्यापकत्व
मेव भगवतः सदाशिवेश्वरत्वमतो भुजायमानं प्रति कीदृक्प्रमेयस्फुरणमतत्र इति संदेहमपोहते १ श्लोकत्रयेण ॥
तेनाभिन्नावभासार्थाः प्रकल्प्याः प्रत्यगात्मनः तेन हि भिन्नसंज्ञाभिः स्मृत्युत्प्रेक्षादिगोचरे तस्यासाधारणीः
सृष्टिरीशसृष्ट्युपजीविनी सैषाप्यज्ञानतया संसारैवेशशक्त्या तदात्मनः स्वविश्रांत्यवरोधायचलया प्राणरू
पया विकल्पक्रियया तत्त्वदर्शनैवेचिव्य विवृत्त्या ॥ ९ ॥ तु विशेषं योजयति प्रत्यगात्मनालिंग्य प्रमेयरूपाश्च
र्थानन्तीश्वरवत्कतयेनेतिभिन्नं इति मिश्रामिश्रतयाभियमानश्चाभासो येषामर्थानां ते विशेषसामान्या
त्मानोर्थाः प्रत्यगात्मनः प्रतिपुरुषमव्यामिश्रस्वसंवेदनावगमरूपस्यासंकीर्णाहंप्रकाशात्मनः प्रकल्प्या
विकल्पनीयः प्रतिप्राणिस्ववासनानुसारेण विभिन्नाभिः संज्ञाभिः प्रियोयंशत्रुरयमित्यादिकाभिर्भावनाविशेषा
नुसारेण तत्रादिचित्ररूपत्वादः स्वायुपयुक्ताभिः स्मरणोत्प्रेक्षणसंकल्पने प्रत्यक्षान्यत्र च विकल्पयोगेपतत्कृतं
भवतीति ईश्वरस्य विकल्पात्मकतामेतरेण स्फुटविमर्शविषयीभावादर्थाः पशोस्तत्त्वन्यान्यापोहनहेवा किं न
विकल्पे समारूढा लोकार्थाभवंति सांसारिकहानादानादिव्यवहारोपयोगात् इति नन्व विकल्पनेयावानेवा
र्थस्तावानेव विकल्पनेतत्को विशेषः प्रमेयस्य पतिपदृरूपतायामुच्यते तस्येति पश्चकर्तृकासृष्टिस्तेषाम ७८

र्थानामीशसृष्टानामुपरिवर्तिनी प्रत्यवतामीश्वरसृष्टिमुपजीवंतीमसाधारणी प्रतिप्रमातृविषयता तद्यथा इदं
दे॰ प्रियमिति येन सृष्टं तत्तस्यैव तथा नान्यस्य ननु यदि पशोरपि सृष्टिशक्तिरस्ति तदीश्वर एव सत्यमीश्वर एवासौ ननु
वं साधारणत्वं कस्मात् सृष्टेर्न भवति भवेद्यदि स्वशक्तिं परिजानीयात् यावता सा तस्यापरिज्ञाता परवशस्यैव सतो
रु॰ विकल्पक्रिया विकल्पनशक्तिरुदेति ननु केन सा तस्याप्यत इत्याह ईश्वरस्य परामर्शरूपतया शब्दराशिलक्ष
णस्य या शक्तिः स्वरूपविश्रांतिलक्षणा पारमेश्वर्यावरोधप्रयोजना ब्राह्म्यादिदेवताचक्रमयी तैस्तैः ककारादि
वर्णैर्वैचित्र्यैर्विचित्रतया यासौ विकल्परूपा क्रिया तस्य पशोरेकत्र निरूढाभावाच्चचला तेन मित्रमिदं शत्रुरयमि
त्यादि वर्णवैचित्र्यानुविद्धतया विकल्पनक्रियया तदात्मन ईश्वरस्वभावस्यैव पशोरसाधारणी सृष्टिः पंचदं
तेष्वपि वं क्रोह सीनभसिया वतीत्यपि विमिश्रतया विकल्पसृष्टिस्तानाभासानीश्वरसृष्टाने वोपजीवतीति सा
र्वापाशवी प्रत्ययसृष्टिरीश्वरसृष्ट्युपजीविनीत्युक्तम् नन्वेवं यदि पाशवी सृष्टिः संसाररूपा तर्हि पारमेश्वरी सृष्टिः
पशोः किं कुर्यादिति निर्णीयते ॥ साधारणोन्यथा येशः सर्गः स्पष्टावभासनात् विकल्पहानेनैकाग्र्यात्क्रमेण
श्वरतापदम् ॥ येश्वरः सर्गो द्विधा साधारणश्च घटादिरसाधारणश्चान्यथेति निर्दिष्टो हि चंद्रादिः तस्य च सामा
न्यलक्षणस्पष्टावभासनं नाम सोयं सर्गो यदा विकल्पहानक्रमेण तस्मिन्निर्विकल्पकपरिगृहीत वस्पष्टा १०
भेर्थे एकाग्रतमवलंब्याहमिदमित्यैश्वर्यपरामर्शपदं भवति तदा तल्लक्ष्यवदिहैव दृष्टिनिमेषोन्मेषपरिहारोपदे

शास्त्रिमाक्रमेणाभ्यासनात् तन्मयेन पशोः पशुत्वं प्रतिहन्तीश्वरत्वं च दर्शयति ।१ किं च योयं विकल्पसर्गः पाशवत्वकृत्सोपि
यद्यन्यथेति पूर्वोक्तरूपवैपरीत्येन परिज्ञातेयुः शाक्तापरिज्ञानतादात्म्यसम्भवति तदा सोपि साधारणपक्षप्रमापायनाभि
७५ चरणध्वात्यादिविकल्पः एवमस्तमंत्रस्य भावितोन्तःकरणस्य एवं विकल्पनिर्ह्रासेन निर्विकल्पकतो मात्मीभावे वि
म्यात्मसाक्षात्कारलक्षणः सप्रत्यय एव मोक्षो दर्शितः अधुना विकल्पनिर्ह्रासाभावेपि तं दर्शयति ।। सोहं ममा
यं विभवः इत्येवं परिजानतः । विश्वात्मनो विकल्पानां प्रसरेपि महेशता ।। न हि स्वात्मनामात्मा नाम पशुः कश्चिदन्यो
योपि हि अपितु परिगृहीतमायाख्याहंकारस्यैकस्यैव नाथः स एवाहं स चाहमेव तत्त्वतः कश्चित् अतो विकल्पा
स्वाहिरपि मम स्वातंत्र्यलक्षणो विभव इति एवं विमर्शे दृढीभूतेन सत्यपरिक्षीणविकल्पोपि जीवन्नेव मुक्तः यथो
क्तं शंकापि न विशंकेन तेनिःशंकत्वमिदं स्फुरमिति नन्वेवं बद्धमुक्तयोः प्रमेयं प्रतिको भेदः उच्यते ।। मेयं सा
धारणं मुक्तः स्वात्माभेदेन मन्यते महेश्वरो यथा बद्धः पुनरत्यन्तभेदवत् ।। श्रीमत्सदाशिवेश्वरपदारम्भकर्मि
पर्यन्तप्रमातृवर्गापेक्षया यद्दृश्यमिति रूपं तदेवात्मतयाभिनिविष्टो मुक्तः तत्र च विश्वस्यापि प्रमेयं ममापि
मम प्रमेयं विश्वस्यापि प्रमेयं चेदं ममैवोपगृहीतप्रमेयात् समापि तथेत्यनेन क्रमेण परस्परतश्च प्रमातृवर्गाच्चाप्या
हृतं इत्येकरसाभेदविश्रान्तितत्त्वमस्य सर्वं परामर्शपदमुपैति बद्धस्य तत्सर्वमेतद्विपरीतमित्येकरसभेदविश्रा
न्तपक्षा सो ९ ननु सदाशिवेश्वरभुवि जीवन्मुक्तिपदे बद्धरूपपशुप्रमातृविषये च प्रमेयद्वैततातः परीक्षितः पर ७५

मशिवेन कथमसावित्याशंक्याह ।। सर्वथा त्वन्तरालीनानन्ततत्त्वौघनिर्भरः शिवश्चिदानन्दघनः परमाक्षरवि
ग्रहः ।। न खलु भाव तिश्री परमशिवे प्रमेयकथा काचिदस्ति तत्त्वौघस्य सर्वथान्तश्चिद्रूपतामात्रविश्रान्त्याली
नत्वात् तत्र स्वासावस्था संवित्स्वभावेन स्वात्मविश्रान्त्यानन्देनाकृत्रिमेण सार्गिकपरामर्शात्मकस्वात्मक्षर
लक्षणेन पक्षवना प्रविच्छिन्नरूपा यस्मात् स एव विग्रहवती भगवतो विश्वमयस्यानवच्छिन्नानुत्तरपातोलि
न प्रमेयकथा सर्वौघौघाणां पादि ते एवमधिकारवत्तच्छ्योकं यद्धस्तस्य फलमाह ।। एवमात्मानमेतस्य
सम्यग्ज्ञानक्रिये तथा पश्यन् यथेप्सितान् जानाति च करोति च ।। एवमितीश्वररूपमात्मानं च स्वा
व्यतिरिक्तं स्वात्मनः प्रमातृरूपे ज्ञानक्रिये च ज्ञानेनैवं भूतोयमात्मानं तु कारणादादिदर्शितं इत्यं च ज्ञानक्रियात्मस
व्यतिरिक्ते केवल इति परामृशन्यथेच्छमिति तत्तज्जानाति करोति च समावेशाभ्यासपरो तेनैव शरीरेण तत्पर
स्तु सति देहे जीवन्मुक्तः तत्पाते परमेश्वर एवेति ।१५ अस्यार्थस्य स्वप्रत्ययसिद्धस्यापि गुरुपरम्परोपदेशोपोद्व
लको वक्तव्यः शास्त्रदृष्टिर्हि दर्शिता आगमाधिकारेण ।१५ एवं गुरुतः शास्त्रतः स्वत एव दृढीकृतं वस्त्वा
भिप्रायेण गुरुपारम्पर्यं दर्शयति ।। इति प्रकटितो मया सुघट एष मार्गो नवो महागुरुभिरुच्यते स्म शिवदृष्टिशा
स्त्रे यथा तदत्र निदधत्पदं भुवनकर्तृतामात्मनो विभाव्य शिवतामयीमनिशमाविशन्सिध्यति ।१८ अस्मत्परमे
ष्ठिभट्टारकश्रीसोमानन्दपादैः शिवदृष्टिशास्त्रे प्रथममभिनवसर्वरहस्यशास्त्रान्तर्गतस्मान्निरूढत्वात्प्रसिद्धेवा

ई. स्वांतरचर्याप्रमाणयामादिक्लेशप्रयासकलाविरहात्स्वच्छलावहतः सर्वथा प्रकटतो परवादकलंकांशंकाथ्यसारणे
टी. ननीतः यत एवं शास्त्रगुरुस्वप्रत्ययसिद्धोयमर्थस्तदितितस्मादत्र प्रमेये पदे परामर्शो विश्रमयन्निष्प्रकर्षलक्षण
८. मैश्वर्यमात्मनो विभाव्य दार्ढ्येन यदि परामृश तितत्परामर्शमात्रादेवतावज्जीवन्मुक्तो भगवान् शिव एव यथोक्तं
परमेष्ठिपादैः एकवारं प्रमाणेन शास्त्राद्वा गुरुवाक्यतः ज्ञातो शिवत्वेतत्रस्य प्रतिपद्याहढ्यात्मना करणेन ना
सिद्धस्यकापि भावनयापि वा सकृज्ज्ञाते सुवर्णे किंभावनाकरणं व्रजेत् सर्वथापि तत्तुमात्रादितल्पद्वार्ढ्ये नस
त्यते स्यादि तांत विभावयत्यनिशमाविश्रान्तिशरीरप्राणबुद्धिमूलेभ्यो न्यतमं हृदयं सर्वदा तत्रैव निमज्जयति
प्रविरतं ततो तां विभूतिं पर विभूतिपर्यंततो लभते न तु यथात्माख्येवस्तु तदेव तर्हि तत्प्रत्यभिज्ञातानभिज्ञा
तयोरविशेषः नहि वीजमप्रत्यभिज्ञाते सति सहकारिसाकल्ये नांकुरं जनयति तकथात्मप्रत्यभिज्ञानेनेति
वैंधः उच्यते द्विविधार्थक्रिया ज्ञानांकुरादिका प्रमातृविश्रान्तिचमत्कारसाराच प्रीत्यादिरूपा तत्राद्यासत्यप्र
तिभिज्ञाते नापेक्ष्यते द्वितीया तु तदपेक्षत एव इदं चेयमस्मीश्वर इत्येवंभूतचमत्कृतिसारा परापरसिद्धिलक्षण
जीवन्मुक्तिविभूतियोगमयार्थक्रियेति इतिईश्वरप्रत्यभिज्ञानमत्रावश्यापेक्षणीयं न तु प्रमातृविश्रान्तिसारार्थक्रि
याप्रत्यभिज्ञानेन विना न ह्यासति च तत्रदृष्टेति केतडपलब्धमित्याशंक्याह ॥ तैस्तैरप्युपयाचितैरुपनतस्त रु.
न्व्याः स्थितोप्यन्तिके कांतो लोकसमानएवमपरिज्ञातो न रंतुं यथा लोकस्यैषतथानवेदितगुणः स्वात्मापि

८०

विश्वेश्वरो नैवालं निजवैभवाय तदियं तत्प्रत्यभिज्ञोदिता ॥ यदा नायकगुणसंश्रवणप्ररूढानुरागा कामिनीत
दर्शनमेवपरमं मयादेयमाकांक्षंती दिवानिशमवशाहृदया दयितोपयाचितानीतस्याः दर्शयपायाचितानि हृ स नी.
म्प्रवणातिमदनले खहारकात्मावस्थानिवेदनानि वक्रर्वाणा विरहता मीभवज्ञाञ्जलिका तिष्ठति तदा तडपया
र्शू. चितवशाद कितमेव सविधवर्तिनि प्रियतमे वलोकिते तैस्तैरुत्कर्षविशेषैः परामर्शपदवीमगच्छद्भिरसाधार
णतामापादितेसंपन्नमपि तत्प्रियतमावलोकनेन सहृदयं पूर्णीकरोति तथा स्वात्मनि विश्वेश्वरे सततंनि
र्भासमानेपि तन्निर्भासनेन हृदयस्य पूर्णतामाधत्ते यतः सोपि स्वात्मा विश्वतत्त्वकर्तृत्वाद्यप्रतिहतस्वशक्ति
लक्षणपारमेश्वर्योत्कर्षयोगेन परामृष्ट इति भासमानश्च दाढितल्पहतोतोजातः यदा तु हृतीवचनात्तेल
क्षणाभिज्ञानाद्वा उपायांतराद्वा नानात्कर्षोल्लहृदयंगमीकरणेनामृशति तदा तल्लक्षणमद्भुतफलं न्यायेनैव
तावत्काममपि पूर्णतामभ्येति परिभोगाभ्यासरसेन विश्रान्त्यंतरापि लभते तदा दात्मनि गुरुवचनाज्ज्ञाना
क्रियालक्षणशक्त्यभिज्ञानादेवास्य पारमेश्वर्योत्कर्षोस्य हृदयंगमीभावो जायते तदा तल्लक्षणमेव पूर्णतात्मिका
जीवन्मुक्तिः समावेशाभ्यासरसेन विभूतिलाभ इति तत्प्रत्यभिज्ञैव परापरसिद्धिप्रदायिनी भवति ९ सर्वो
पकारकमिदं महाफलं शास्त्रं प्रसिद्धान्वयोगेन नामधेयप्रसिद्ध्या च तत्कर्षमरणद्वारेण जनितसंभावना
प्रत्ययलक्षणप्रवर्तकसंवेदनया जनं प्रवर्तयितं प्रतिनीशास्त्रनाम्ना चोपसंहारं दर्शयति ॥ जनस्यायत्नसि

ई॰ टी॰ ८१

ऽर्थमुदयाकरसूनुना ईश्वरप्रत्यभिज्ञेयमुत्पलेनोपपादिता ॥ यस्यकस्यापिजन्तोरितिनाजात्याद्यपेक्षा न
काचिदितिसर्वोपकारकत्वमुक्तम् प्रयत्नेनसिद्धिः परापररूपायथास्यादितिमहाफलत्वम् उदयाकरस्यसूनुः
श्रीमानुत्पलदेवोऽस्मत्परमगुरुरिदंशास्त्रंसमकार्षीदितितत्प्रसिद्ध्याजनः प्रवर्ततेइतिप्रवर्तनाद्वारेणासोऽनुग्र
हीतोभवतीत्युभयनामनिर्देशः इयमिति हृदयंगमतामुपपादिष्टानेरानीतेतिशिवम् इति ॥ तत्त्वार्थ
संग्रहाधिकारोनामतृतीयमाह्निकम् समाप्तश्चायमागमाधिकारस्तृतीयः ग्रादितः श्लोकः २५२ ॥
यथाभिनवगुप्तेनसूत्रार्थप्रविमर्शिनी रचिताप्रत्यभिज्ञायालेशोद्धृतिनिरभंगुरा वाक्यप्रमाणपदतत्त्वसदा
गमार्थ्याः स्वात्मोपयोगमभ्युपेतःकिलयांतिशास्त्रात् भोगमात्रमसौजलमयोऽम्बुजस्यपृष्ठेसुमकार्कमेकमि
हयोजयितुंदक्षमोऽन्यः ॥ आत्मानमनभिज्ञायविवेकंयोऽन्यस्त्रिच्छति तेनभोजेनकिंवाच्यंप्रश्नेऽस्मिन्कोभवा
निति ॥ इतिश्रीमहामाहेश्वराचार्यवर्यश्रीमदाचार्याभिनवगुप्तविरचितामहेश्वरप्रत्यभिज्ञासूत्रविम
र्शिनीसंपूर्णासमाप्तेतिशिवम् ॥

८

2,250
3-6-69

Folias - 81
size - 20 x 35 cm.

NATIONAL MISSION FOR MANUSCRIPTS
MANUS DATA

DSO 00001 7285

Record No.	Organization / Individual 7285

Name of the Institution: Oriental Research Library, University Campus, Hazaratbal, Srinagar. Personal Collection	Communication Address: Department of Libraries and Research, Municipal Complex, Karanagar, Srinagar.

Title of the Text: Is'vara pratyābhijñāvimars'ni Other Title	Bundle No: 8 Acc. No./Manuscript No. 2250
Author: Abhinavagupta	No. of Folios 81 83 Pages 162
Commentary: yes	Size of Mss. 20×35 cm Material: Paper/palm leaf/birch-bark/cloth/leather/others
Commentator: NO	Missing portion NO
Language: Samskrit	Illustrations NO Complete/Incomplete
Script: S'ārdā	Condition: Good/bad/brittle/worm eaten.Fungus/Stuck
Date of Manuscript	Source of Catalogue: Descriptive/Hand list/Alphabetical/Index card
Key words: Saiva Dars'ana	Colour of Manuscripts: cream
Subject: Saivisma	Remarks: loose folios

19.04.06